# संस्कृतिसुधा



सप्तमवर्षीया ◈ प्रथमसंख्या ◈ चैत्रः १४२७ ◈ मार्च २०२१ ◈ बेलुडमठः





# सूचीपत्रम्

दिव्यवाणी ५

सम्पादकीयम्  ६

प्रबन्धः/लघुबन्धः

— अपादानसंज्ञाविधायकसूत्राणां विषये आचार्याणां मतम् – राहुलमाइतिः ७-९

— अहम् – वापन-रुइदासः १०

— दशरूपकम् : एकं संक्षिप्तं समीक्षणम् – सुरेश-घोषः १२-१४

— आयुर्वेदशास्त्रं वर्तमानजीवनञ्च – नवकुमाररायः १८-२१

— पुरुषार्थचतुष्टयम् – बुद्धदेवदासः २५-२८

— नवीनशिक्षानीतिः – तुहिनमण्डलः ३१-३३

— विदुरनये पण्डितलक्षणम् – शिवनाथ-सर्दारः  ३४

पद्यानि — स्नेहः – विमलरक्षितः २४

कथा/लघुकथा/पुनःकथनम्

— राजकुमारशुभ्रांशोः वरलाभकथा – प्रियव्रतव्यानार्जिः १०-११

— तीर्थे तपस्यायां च – सुकुमार-बाग्दी १५

— का विचारणा — अभिषेकदासः  १६-१७

— गुरुभक्तेः  माहात्म्यम् – अर्घ्य - गुप्तः २२-२३

— पीतः पक्षी – शुभेन्दु-घोषः २९-३०

— भावान्तरम् – भास्करदासः ४७

ग्रन्थपर्यालोचनम् — मोहमुद्गरस्तोत्रसरलार्थः – शुभङ्कर-दासः ३५-४१

जीवनकथा

— श्रीविद्यारण्यस्वामिनः – सौरभ-पोडेलः ४२-४५

— मारिया-शारापोभा – शङ्करमण्डलः ४६

संख्याबन्धः – अभीपालः ४८

वीरवाणी — ४९-५०

लेखाह्वानम् — ५१

**प्रकाशकः** — साधारणसम्पादकः,
रामकृष्णमठः रामकृष्णमिशन् चेत्यनयोः।
बेलुडमठः, हावडा, पश्चिमवङ्गः।
*रामकृष्णमिशन्-विवेकानन्दविश्वविद्यालयः रामकृष्णमिशन्-शिक्षणमन्दिरम् रामकृष्णमिशन्-विद्यामन्दिरम् रामकृष्णमठविवेकानन्दवेदविद्यालयश्चेत्येतेषां मिलितप्रयासेन बेलुडमठ-हावडा-पश्चिमवङ्गस्थितयोः रामकृष्णमठः रामकृष्णमिशन् चेत्यनयोः पक्षतः रामकृष्णमिशन्-विद्यामन्दिराख्यमहाविद्यालयात् प्रकाश्यमाना।*

**पत्रिकायामत्र यत्र तत्र सन्निवेशितं तथ्यजातं संपूर्णतया प्रबन्धकर्तुरेव नान्यदीयमित्यवधेयम्।**

**सम्पादकाः** **स्वामिजपसिद्धानन्दमहाराजपादाः**, संस्कृतविभागीयः, रामकृष्णमिशन्-विवेकानन्दविश्वविद्यालयस्य
**ड. हरेकृष्णपट्टजोषी**, सहकारी आचार्यः, संस्कृतविभागीयः, रामकृष्णमिशन्-विद्यामन्दिरस्य
**श्रीमान् विप्लवकोटालः**, सहकारी आचार्यः, संस्कृतविभागीयः, रामकृष्णमिशन्-विद्यामन्दिरस्य
**श्रीमान् विमलरक्षितः,** सहकारी आचार्यः, संस्कृतविभागीयः, रामकृष्णमिशन्-विद्यामन्दिरस्य


*उपदेष्टारः* स्वामिन आत्मप्रियानन्दमहाराजपादाः, स्वामितत्त्वसारानन्दमहाराजपादाः, स्वामिशास्त्रज्ञानन्दमहाराजपादाः, स्वामिन एकचित्तानन्दमहाराजपादाः

*पत्रविन्यासकारौ*

**श्रीमान् विप्लवकोटालः**, सहकारी आचार्यः, संस्कृतविभागीयः, रामकृष्णमिशन्-विद्यामन्दिरस्य, बेलुडमठस्थितस्य

**ड. तापससाहाः**, सहकारी आचार्यः, वङ्गभाषासाहित्यविभागीयः, सेन्ट् जेभियार्स् कलेज् इत्याख्यस्य महाविद्यालयस्य, कोलकातास्थितस्य

# दिव्यवाणी



**[श्रीरामकृष्णः तथा गृहस्थाश्रमस्य भक्त – वधू – गणं प्रत्युपदेशः]**

द्वे भक्त-गृहिण्यौ आगत्य श्रीप्रभुं प्रणतवत्यौ। ताभ्यां श्रीप्रभोः दर्शनार्थम् आगतम्, अत उपवासे स्तः। द्वे यातरौ अवगुण्ठनवत्यौ। द्वयोः सोदरयोः वध्वौ। वयसा द्वाविंश-देशीये त्रयोविंशदेशीये वा, उभावेव सुत-जनन्यौ।

श्रीरामकृष्णः – (वध्वौ प्रति) पश्य युवां शिवपूजां कुरुतम् । कथं पूजा विधेया इति नित्य-कर्माख्यो यो ग्रन्थः अस्ति तद्ग्रन्थं पठित्वा अवगच्छेतम् । देव-पूजा क्रियते चेद् देव-पूजानुषङ्गि कर्म बहुकालं यावत् कर्तुं शक्येत। पुष्प-चयनम्, चन्दन-संघट्टनम्, देव-वर्तन- परिमार्जनम्, देवता-नैवेद्य-प्रकल्पनम् इत्येतत्सकलं क्रियते चेत् मनः तद्गतम् एव स्यात् । हीन-बुद्धिः, क्रोधः, हिंसा – इत्येत्सर्वम् अपगच्छेत् । द्वाभ्यां यातृभ्यां यदा आलापः करिष्यते तदा दैवत- सम्बन्धिनी एव वार्ता क्रियेत ।

**[श्रीरामकृष्णः तथा प्रतिमा-पूजायाः माहात्म्यम्]**

“कथमपि ईश्वरे मनसो योजनं कर्तव्यम् । सकृदपि तद्विस्मृतिः मा भूत्; यथा तैलधारा निरवच्छिन्ना । एकमिष्टकं पाषाण-खण्डं वा ईश्वर-धिया भक्ति-भावेन पूजयसि चेत् तेनापि तत्कृपया ईश्वर- साक्षात्कारो भवितुमर्हति । “पूर्वं यद् अवोचं शिव-पूजा – इत्येतसर्वं पूजनं कर्तव्यम् । ततः परिणत-दशायाम् अधिक-दिनं पूजा न करणीया स्यात् । तदा शश्वदेव मनोयोगः तिष्ठति । सदैव स्मरण–मननं भवति ।”

ज्येष्ठा वधूः (श्रीरामकृष्णं प्रति) – आवाभ्यां किं किञ्चित् स्वल्पं वक्ष्यति ?

श्रीरामकृष्णः (सस्नेहम्) – अहं मन्त्रं न ददामि। मन्त्रो दीयते चेत् शिष्यस्य पाप-ताप-ग्रहणं कर्तव्यम्। माता मां बालकावस्थायां स्थापितवती । इदानीं युवाभ्यां शिव-पूजनं यथा मया उपदिष्टं तथैव विधेयम्। मध्ये मध्ये आगन्तव्यम् – परम् ईश्वरेच्छया यद् भाव्यं तद् भवेत् । स्नान-यात्रा-दिवसे पुनरागन्तुं चेष्टा कर्तव्या । गृहे हरि-नाम-कीर्तनाय मया यद् उपदिष्टं तत् किं भवति?

वधूः (श्रीरामकृष्णं प्रति) – आम्, महोदय ।

श्रीरामकृष्णः – युवाभ्याम् उपोष्य कथम् एतम् ? भुक्त्वा आगन्तव्यम्। महिला मम मातुः एकैक-रूपाणि यतः, ततः तासां क्लेशम् अहं सोढुं न शक्नोमि । जगन्मातुः एकैक-रूपाणि । भुक्त्वा आगन्तव्यम्, सानन्दं स्थातव्यम् । इत्युक्त्वा श्रीयुक्तं रामलालं वध्वौ उपावेश्य सजल-भोज्यं प्राशयितुम् आदिदेश। फलहारिणी-पूजायाः प्रसादम्, लुचिकाम्, नानाविध-फलानि, काच-पानपात्र-पूरं शार्कर-पानीयम्, मिष्टान्नादिकं ते प्राप्तवत्यौ ।

श्रीप्रभुणा उक्तम् – “युवाभ्यां किञ्चिद् भुक्तम्, इदानीं मम मनः शीतलं जातम् । अहं महिलानाम् उपवासं सोढुं न शक्नोमि ।”

**[*श्रीश्रीरामकृष्णकथामृतम् , तृतीयभागः* , पृ. ११३-११४]**

# सम्पादकीयम्

**सा संस्कृतिसुधा दिव्या जगति जयतात्सदा ।**

**दिशन्ती संस्कृतं चारु संस्कृतिं विश्वविश्रुताम् ।।**

कालो जगद्भक्षक इत्युक्तिरियमतितरां भजते सार्थकताम् । कालः केन रूपेण पदं भुवि निधीयमानः कवलीकुरुतेऽखिलानिति दुर्ज्ञानं दुर्वर्चश्च निखिलानाम्। करोना-महामारी-सनाथितः कालः क्रीडां करिष्यत्यखिलेऽत्र धरातल इति न केनापि मनुजनुना स्वप्नेऽपि व्यचिन्ति। ईश्वरेच्छाया बलवत्त्वेन व्यथेयं दुर्वचा प्रत्यक्षीकृता समैः। परन्तु निराकरणमेतस्या अद्यावधि न जातम् । उपर्युपरिबुद्धीनां चरन्तीश्वरबुद्धयः इति अभियुक्तोक्तेः मनुष्याणामखिला बुद्धय ईश्वरबुद्धेः पुरतो भवन्ति निष्क्रियाः । अत एव ईश्वरानुकम्पा नितरां काम्या । सोऽयमीश्वरो विधृतानेकावतारो बहुधा रक्षत्यस्मान्। तदर्थमुच्यते –

मत्स्याश्वकच्छपनृसिंहवराहहंस-

राजन्यविप्रविबुधेषु कृतावतारः ।

त्वं पासि नस्त्रिभुवनम्..... इति ।

विप्रवंशे भगवान् श्रीरामकृष्णरूपेणावतीर्य स्वलीलया परश्शतैः साधनैश्च यां नवीनां दिशमुद्घाटयाञ्चकार सा श्रेयः प्रेयश्च प्रेप्सुभिरखिलैश्श्रोतव्या मन्तव्या निदिध्यासितव्या च । जगत्कल्याणाय तन्मुखाद् या कथासुधाधारा प्रवाहितासीत्तां मनागाश्लिष्यास्मत्संस्कृतिः सुधामयी सञ्जाता । सेयं सरलसंस्कृत-भाषामयी संस्कृति-सुधानाम्नी पत्रिका तदङ्घ्रिसरसीरुहं शनैः सर्पन्ती पावित्र्यातिशयं नितरां वहन्ती प्रस्तूयते स्तुतचरितानां भवतां पुरतः इति ।

संपादकाः

प्रबन्धः

# अपादानसंज्ञाविधायकसूत्राणां विषये आचार्याणां मतम्

राहुलमाइतिः

(स्थानम् - कस्मिंश्चित् दिवसे रामकृष्णमिशन्विवेकानन्दशोधसंस्थायां शास्त्रीयद्वितीयवर्षस्य व्याकरणवर्गे जाता काचित् संघटना इयम् ।)

**आचार्यः** - अमित त्वं कथय- हिमवतः गङ्गा प्रभवति इत्यस्मिन् वाक्ये हिमवतः इत्यत्र अपादानसंज्ञा केन सूत्रेण विहिता वर्तते ?

**अमितः** - (स्वात्मगतम्) ह्य आरात्रिकं पावजीति क्रिडितवान्, पुस्तकं तु नैव स्पृष्टवान् । किं वदामि उत्तरम् । अपादानकारकविधायकं तु एकमेव सूत्रं जानामि 'ध्रुवमपायेऽपादानमि'ति ।

**आचार्यः**- किं भोः एतावत्कालपर्यन्तं किं चिन्तयसि ? कथय तावत् उत्तरम्-

**अमितः**- आम् आचार्य, 'ध्रुवमपायेऽपादानम्' इति सूत्रेण तावत् अपादानसंज्ञा.......

वर्गे अन्ये छात्राः तस्य उत्तरं श्रुत्वा हसितवन्तः, ते च चिन्तितवन्तः आचार्यः अमितं दण्डयिष्यतीति । परन्तु आचार्यः निमेषं यावत् मौनं स्थित्वा उक्तवान् उपविश अमित । अन्ये छात्राः चकिताः, ते जानन्ति 'भुवः प्रभवः' इति अस्ति समीचीनमुत्तरं, तथापि कथम् आचार्यः अमितं न भर्त्सितवानिति।

**सैकतः** - आचार्य अहं प्रष्टुमिच्छामि, किं तावत् अमितस्य उत्तरं सम्यक् अस्ति वा?

**आचार्यः**- विषयोऽयं सन्देहास्पदम्, अतः सम्यग् न वा इति भवन्तः विचारयन्तु, मया अस्मिन् विषये विचारः प्रस्तूयते - यद्यपि महतः आचार्यस्य पाणिनेः मते 'भुवः प्रभवः' इति सूत्रेणैव अपादानसंज्ञा, तथापि भाष्यकारः भगवान्पतञ्जलिस्तु तत् सूत्रं खण्डितवान्। भगवान्पतञ्जलिस्तु अपादानविधायकं "ध्रुवमपायेऽपादानमि"त्यैकमेव सूत्रं स्वीकृत्य अन्यानि अपादानसंज्ञा-विधायकानि सूत्राणि खण्डितवान्। कथं खण्डितवान् तदधुना वच्मि- ध्रुवमपायेऽपादानमिति सूत्रे वार्तिककारेण वररुचिना प्रोक्तं "जुगुप्साविरामप्रमादार्थानामुपसंख्यानम्" इति । वार्तिककारमते जुगुप्साद्यर्थकधातुभिः प्रयोगे जुगुप्सादि-विषयस्य अपादानत्वमिष्टमस्ति, तच्च ऋते उपसंख्यानात् न प्राप्नोति। यतो हि पापाज्जुगुप्सते, धर्मात् प्रमाद्यति, धर्मात् मुह्यति, पापाद्विरमति एतादृशेषु स्थलेषु यत्र विभागजसंयोगानुकूलोऽ-वधिसाकाङ्क्षो गतिविशेषः नास्ति तत्र तु अपायाभावात् ध्रुवमपायेऽपादानमित्यस्य अप्रवृत्त्या अपादानत्वं न स्यात् इति। अतः वार्तिककारेण उपसंख्यानं कर्तव्यमित्युक्त्वा वार्तिकं रचितम्। परन्तु भाष्यकारेण प्रोक्तं- "न वक्तव्यम्। इह तावत् - अधर्माज्जुगुप्सते अधर्माद्बीभत्सते इति। य एष मनुष्यः प्रेक्षापूर्वकारी भवति, स पश्यति दुःखोऽधर्मो नानेन कृत्यमस्तीति। स बुद्ध्या सम्प्राप्य निवर्तते। तत्र ध्रुवमपायेऽपादानम् इत्येव सिद्धम्।"

अर्थात् अधर्माज्जुगुप्सते इत्यादिस्थले- यद्यपि विभागजसंयोगानुकूलोऽवधिसाकाङ्खो गतिविशेषः प्रसिद्धः अपायः नास्ति, तथापि बुद्धिव्यवस्थितापायस्य आश्रयणादत्रापि अपादानसंज्ञा प्रवर्तते।

**नयनः** - महोदय, बुद्धिव्यवस्थितापायस्यापि अपायत्वेन ग्रहणे किं मानम्?

**आचार्यः**- तत्र "साधकतमं करणमिति" सूत्रे साधकं करणमित्येतावता कृते कार्ये सिद्धे यत् तमब्ग्रहणं करोति आचार्यः, तज्ज्ञापयति आचार्यः यत् अस्मिन् कारकप्रकरणे गौणमुख्यन्यायः न प्रवर्तते। अन्यथा आधारोऽधिकरणमिति सूत्रेण तिलेषु तैलम् इत्यत्रैव तिलस्य अधिकरणसंज्ञा स्यात् तस्य अभिव्यापकत्वात् प्रकृष्टाधारत्वात्, वटे गावः, गङ्गायां घोषः इत्यादिषु स्थलेषु औपश्लेषिकाधारत्वात् गौणाधारत्वात् वा अधिकरणसंज्ञा न स्यात्, तेन च सप्तम्याः प्रयोगः न स्यात्, गङ्गायां घोषः इति वाक्यं न सिध्येत्। अतः साधकतमं करणमिति सूत्रे तमब्ग्रहणम् इदमेव ज्ञापयति यत् - "कारकसंज्ञायां तरतमयोगो न भवतीति" । अस्य व्याख्याने कैयटेन उक्तम्- "तत्र तमश्रुतिरेतज्ज्ञापयति प्रकर्षप्रत्ययग्रहणमन्तरेण इह प्रकरणे सामर्थ्यगम्यः प्रकर्षो नाश्रीयते" । तत्रैव भाष्यकारेण कारकसंज्ञायां तरतमयोगो न भवतीति इत्यस्य ज्ञापने किं प्रयोजनमिति पृष्ट्वा स्वयमुत्तरति- "अपायमाचार्यः किं न्यायं मन्यते? यत्र संप्राप्य निवृत्तिः। तेनैहैव स्यात् - ग्रामात् आगच्छति। सांकाश्यकेभ्यः पाटलिपुत्रकाः अभिरूपतरा इत्यत्र न स्यात्। कारकसंज्ञायां तरतमयोगो न भवति इत्यत्रापि सिद्धं भवति" ।

अर्थात् यदि अपायो नाम **संप्राप्यनिवृत्तिः** इत्येव मन्यते तर्हि ग्रामाद् आगच्छति इत्यत्रैव अपादानसंज्ञा स्यात्, सांकाश्यकेभ्यः पाटलिपुत्रकाः अभिरूपतरा इत्यत्र संप्राप्यनिवृत्तेः अभावात् अपादानत्वं न सिध्यति। परन्तु कारकसंज्ञायां तरतमयोगो न भवति इत्यस्य स्वीकारेण बुद्धिपरिकल्पितापायस्यापि ग्रहणं भवति। अतः अपादानमिति महासंज्ञयैवापाये ध्रुवे लब्धे पुनः तद्ग्रहणसामर्थ्यात् प्रकर्षविवक्षायां मुख्यापायस्यैव या अपादानसंज्ञा प्राप्ता आसीत् सात्र न स्यात्। परन्तु प्रोक्तनियमात् सांकाश्यकेभ्यः पाटलिपुत्रका अभिरूपतरा इत्यत्र मुख्यापायाभावे अपि अपादानसंज्ञा सिध्यति।

अतः सिद्धान्ततः वक्तुं शक्यते - कारकप्रकरणे "गौणमुख्ययोः मुख्ये कार्यसम्प्रत्ययः" इति या परिभाषा सा न प्रवर्तते, साधकतमं करणमिति सूत्रे तमब्ग्रहणसामर्थ्यात्। एवं च तस्य फलमस्ति- गौणाधारस्य औपश्लेषाधिकरणस्यापि अधिकरणसंज्ञा, बुद्धिपरिकल्पितापयतः अपि अपादानसंज्ञा ।

अत एव अधर्माज्जुगुप्सते इत्यत्राह- यः प्रेक्षापूर्वकारी भवतीति अर्थात् - धर्माधर्मयोः एकाकारबुद्धिः यस्य नास्ति सः जानाति अधर्मेण पापाधिक्यं स्यात् अतः बुद्ध्या विचार्य एव सः अधर्मात् निवर्तते इति। अतः बुद्ध्या एव आपायः भवतीति। अयं गौणः अपायः, तथापि अत्र अपादानसंज्ञा सिध्यति, ध्रुवमपाये अपादानमिति सूत्रेणैव। अतः नास्ति प्रयोजनम् उपसंख्यानेनेति। इत्थं भाष्यकारेण जुगुप्साविरामप्रमादार्थानामुपसंख्यानमिति वार्तिकं खण्डितम्।

इत्थमेव इह धर्माद्विरमति धर्मान्निवर्तते इति। धर्मात्प्रमाद्यति धर्मान्मुह्यतीति। इह य एष मनुष्यः सम्भिन्नबुद्धिर्भवति स पश्यति- नेदं किञ्चिद्धर्मो नाम नैनं करिष्यामीति स बुद्ध्या सम्प्राप्य निवर्तते। तत्र ध्रुवमपायेऽपादानमित्येव सिद्धम् , इति भाष्यवाक्यं बोध्यव्यम्।

एवञ्च अस्माकं यः प्रश्नः आसीत् हिमवतः गङ्गा प्रभवति, तत्रापि भाष्यकारेण उक्तम्- अयमपि योगः शक्योऽवक्तुम्। तर्हि कथं सिध्यति इति चेदाह- "अपक्रामन्ति तास्तस्मादापः"। अर्थात् लोके हि यत् यस्माज्जायते तत् तस्मात् निर्गच्छति इति उच्यते। अत्रापि तथा हिमवतः गङ्गा निर्गच्छति इति बुद्ध्या विच्छेदं परिकल्प्य अपादानत्वं सिध्यति। यद्यपि सिद्धान्तकौमुद्यां तु 'भुवः प्रभवः' इति सूत्रे प्रभवः इति शब्दस्य प्रथमदर्शनमित्यर्थः कृतः। तदेवाह वासुदेवदीक्षितः- "प्रथमं प्रकाशतेऽस्मिन्निति प्रभवः, प्रथमप्रकाशनस्थानमित्यर्थः" एतदर्थस्वीकारे तु सूत्रस्यापेक्षा वर्तते, परन्तु भाष्यकारस्तु प्रभवः इत्यस्य अपक्रमणार्थमाश्रित्य ध्रुवमपायेऽपादानमित्यनेनैव अपादानत्वं साधयित्वा सूत्रं प्रत्याख्यातवान्।

एवं 'भीत्रार्थानां भयहेतुः' (१/४/२५) इत्यारभ्य भुवः प्रभवः (१/४/३१) इति सप्त सूत्राणि प्रत्याख्यातवान् भाष्यकारः, बुद्धिपरिकल्पितापादनत्वम् आश्रित्य। तदेव आह – भुवः प्रभवः इति सूत्रव्याख्यायां तत्त्वबोधिन्यां ज्ञानेन्द्रसरस्वतीमहाभागः- "भीत्रार्थानाम् - इत्यारभ्येयं सप्तसूत्री भाष्ये प्रत्याख्याता"। तद्यथा- चौरेभ्यः बिभेति इत्यस्य भयान्निवर्तते इत्यर्थः। चौरेभ्यः त्रायते इत्यस्य चौरेभ्यः रक्षणेन निवर्तयतीत्यर्थः, अध्ययानात् पराजयते इत्यस्य अध्ययनात् ग्लान्या निवर्तत इत्यर्थः, उपाध्यायात् अधीते इत्यस्य उपाध्यायान्निःसरन्तं शब्दं गृह्णातीत्यर्थः, ब्रह्मणः प्रजा प्रजायन्ते इत्यस्य ब्रह्मणः प्रपञ्चः प्रजायते इत्यत्रापि ततोऽपक्रामतीति, निर्गच्छतीत्यर्थः। प्रभवतीत्यत्रापि भवनपूर्वकं निःसरणमर्थः। तथा च भाष्यकारमते सर्वत्रैव बुद्धिपरिकल्पितापायस्यैव अपायत्वेन आश्रयणात् ध्रुवमपायेऽपादानम् इत्यनेनैव इष्टरूपसिद्धिः। एवञ्च वचनमेव अस्ति यत्- "यथोत्तरं मुनीनां प्रामाण्यम्" इति। तदनुसारेण सूत्रवार्तिककर्त्रोः अपेक्षया भाष्यवचनस्यैव प्राबल्यात् सर्वत्रैव एकेन सूत्रेण अपादानसंज्ञा स्वीकर्तुं शक्यते। भाष्यमतमेव आद्रियते लघुशब्देन्दुशेखरकारेण नागेशेन- "एषां धातूनां स्वार्थपूर्वकबौद्धविश्लेषजनकनिवृत्तिलक्षणया सूत्रेणैव सिद्ध्येदं वार्तिकमुत्तरसूत्राणि च प्रत्याख्येयानीति स्पष्टं भाष्ये"।

**सिद्धान्तः** - भाष्यकारनागेशाद्याचार्याणां मते नास्ति तेषां सप्तसूत्राणाम् अपेक्षा, परन्तु सिद्धान्तकौमुद्याः प्रसिद्धटीकाकारः तत्त्वबोधिनीकारस्तु आह- "अनभिधानब्रह्मास्त्रमाश्रित्य प्रत्याख्यानं तु नातीव-मनोरमम्। एवं जुगुप्साविराम- इत्यादिवार्तिकमप्यारम्भणीयम्। तथा च सूत्रवार्तिकमतमेवेह प्रबलम्"। अतः तन्मते-षष्ठीप्रयोगवारणाय सूत्राणामपेक्षा वर्तते एव। एवञ्च भट्टोजिदीक्षितस्तु शब्दकौस्तुभे इदमेव मतमुपस्थापितवान्। अतः अमितेन प्रोक्तमुत्तरम् असमीचीनमिति वक्तुं न शक्यते। इति शम्।

लघुबन्धः

# अहम्

## वापन-रुइदास:

सृष्टेरुत्कृष्टतम: जीव: मनुष्य:। मनुष्याधीनमेव सर्वम्। ते खलु जगत्पालयित्रा भगवता सृष्टा:। अत: अस्माकं स्वरूपमेव भगवदधीनम्। तथापि अस्माकं मध्ये अहम्भाव: सर्वदा प्रस्फुटितो जात:। पृथिव्यां बहुषु व्यवहृतशब्देषु अहमिति शब्दस्य व्यवहार: शब्दान्तरापेक्षया अधिकतया भवति। यथा यदि केनापि कश्चन शिशु: जिज्ञासित: यत् इदं गृहं कस्य ? कस्य क्रीडनकमिदम् ? तदापि इदं मम गृहं क्रीडनं च इति वदति। अत्रापि अहम्भावस्य प्रकाशो भवति। एवमेव सदा मनुष्याणां मध्ये अहंकार: गर्वश्च जायते प्रकाशितश्च भवति। परिणामतया सृष्टेरुत्कृष्ट: जीव: सन्नपि सर्वदा ध्वंसगामी। य: खलु स्वयं सम्पूर्ण: तस्यैव अहंकार: शोभते। स तु सृष्टिकर्ता। यस्य करुणया वयं जीवाम:। अतः अहंकारस्य प्रकाशेन समं मूर्खता प्रकाशिता भवति।

अर्थसम्मानाभिजात्यादीनामाधिक्याद् अहम्भावस्याधिक्यमपि भवति। परन्तु एष दोष:। नैतद् करणीयम्। एतत्तु चिन्तनीयं यत् अहं क: ? कुत: आगच्छामि ? पुन: कुत्र गमिष्यामि ? एतेषां चिन्तनेन अहम्भावस्य विनाशो भवति। राष्ट्रप्रधान: कृषकश्च उभौ भगवता सृष्टौ। तर्हि कथम् अहम्भाव:। भगवत उपरि निर्भरशीला: अहङ्कारिण:। यत: मनुष्य: तत्त्वतः अस्तित्वं लभते, एवं विलीनोऽपि तत्रैव भविष्यति। परन्तु भगवान् सदा अस्तित्ववान्। एकदा वयं सर्वे कालेन विलीना भवाम:। तर्हि अहम्भावेन को लाभो भवति। अहमपि भगवता सृष्ट:। यदि अहं स्वयमेव भगवदधीन: तर्हि अन्यानि वस्तूनि केन प्रकारेण मे स्युरिति शम् ।

कथा

# राजकुमारशुभ्रांशोः वरलाभकथा

## प्रियव्रतव्यानार्जिः

पुरा धर्मपुरनामके नगरे धर्मपालो नामाख्यातः कश्चित् नृपः राजत्वं चकार। स अतीव विद्वान् नैष्ठिकः धर्मपरायणश्च आसीत्।तस्य राज्ञः राज्यसीमा बहुदूरं पर्यन्तं विस्तृता आसीत्।क्षेमनगरी तस्य राजधानी आसीत्।तस्य एकैव भार्या आसीत्।तस्याः नाम भवति श्रद्धा।सा विदुषी सुशीला च आसीत्।तयोः एकैव पुत्रःआसीत्।तस्य नाम भवति शुभ्रांशुः। स तेजस्वी अतीव मेधावी वाक्पटुः विनयी च आसीत्। कुमारावस्थायां हि राज्ये तस्य पराक्रमकथाः लोकमुखे प्रचारिता अभवन्। एकदा राजकुमारः शुभ्रांशुः विविधैहिकज्ञानार्जनार्थम् एकाकी साधारणवेशेन पितृराज्यात् वहिः निर्गतवान्। राज्यात् निर्गतः सन् विभिन्नेषु राज्येषु भमन् विविधविषयेषु चाभिज्ञताः सञ्चयन् स एकदा व्याघ्रसिंहादिहिंस्रपशुवर्जिते कस्मिञ्चित् सुन्दरवने उपस्थितः अभवत्। तदरण्यम् अतीव सुन्दरमपि रहस्य-मयमेव आसीत् । तत्र नानापुष्पफलानां प्राचुर्यम् आसीत्। पक्षिणां कूजनेन वनपरिवेशः मोहङ्करः आसीत्। राजकुमारः शुभ्रांशुः तस्य वनस्य मनोरमपरिवेशम् अनुभवितुं वनस्य रहस्यानि ज्ञातुं च तत्र वने उवास। तत्र अवस्थानकाले प्रथमरात्रौ तस्मिन् वने उपस्थिताः नाना विपदः द्रष्टुं स जाग्रतः आसीत्। प्रथमरात्रे स कामपि आपदं न अपश्यत्। अपितु स तत्र नानासुदुर्लभभेषजद्रुमपुष्पफलानि अपश्यत्। येषां परिचितिज्ञानं रात्रौ एव सम्भवति। स प्रथमरात्रे तत्र कामपि

विपदं न दृष्ट्वा द्वितीयरात्रे निर्भयेण तत्रैव शयनं कृतवान्। अथ मध्यरात्रे स्वप्ने कश्चित् नारीकण्ठस्वरः तम् अवदत्--"पुत्र! शुभ्रांशोः! अहं तव कुलदेवी काली वदामि। त्वं तव पूर्वपुरुषनिर्म्मितकुलमन्दिरपरिसरे एव असि। तव वंशस्य कतिचित् उत्तरपुरुषाः मां तथा मम मन्दिरं विस्मरन्ति स्म। तस्मात् तव पिता मन्दिरम् इदं न जानाति। एवं त्वमपि च। तव शयनस्थानात् दशपददक्षिणदिशि एकं कोकनदशोभितसरो विद्यते। तस्य ईशानभागे मम मन्दिरं स्थापितम् अस्ति। संस्काराभावात् मे अखण्डमन्दिरम् अधुना द्रुमलताभिः आवृतत्वात् सर्वेषां नयनदृष्टेः अगोचरः अस्ति। अद्य प्रभृति एकमासात् परम् अमावस्या आगमिष्यति। त्वं मम मन्दिरं यथासाध्यं परिस्कृत्य सरसि स्नात्वा च शुद्धाचारे आमावस्यायाः घोरनिशायां यथाविधि यथोपाचारैः च मे पूजनं कुर्य्याः" इति।

राजकुमारः शुभ्रांशुः एवं स्वप्नं दृष्ट्वा प्रातः उत्थाय देव्याः आदेशानुसारेण सर्वं कृतवान्। ततः अमावस्यायाः घोरनिशायां यथासाध्यं यथाविधि यथोपाचारैः देव्याःपूजनम् अकरोत्। स च देव्याः पुष्पाञ्जलिमन्त्रेण वारत्रयं कुसुमाञ्जलिं देव्यै प्रायच्छत्। यथा-

"कालि कालि महाकालि कालिके पापहारिणि ।
धर्मकामप्रदे देवि नारायणि नमोऽस्तु ते।।" इति।

पूजाशेषे ब्राह्ममुहूर्ते देवी काली आविर्भूता सती राजकुमारम् उक्तवती--"पुत्र!तव पूजया सन्तुष्टा अस्मि। त्वं तव मनोवासनां वद। वरप्रदानेन तव सर्वकामनापूर्त्तिं करिष्यामि" इति।

एवंप्रकारेण देव्याः वचनानि श्रुत्वा राजकुमारः शुभ्रांशुः सविनयं भक्तिपूर्वकं च उक्तवान् - "मातः कालिके! तव दर्शनेनैव मम सर्वकामनानां पूर्त्तिः सञ्जाता। अतः सद्यः नास्ति मे कापि वरलाभवासना । तव चरणकमलेषु सदा मे मतिः तिष्ठतु इत्येव त्वां निकषा मे प्रार्थना"इति।

ततः देवी तस्य वाक्यैः अतिप्रसन्ना भूत्वा शुभ्रांशवे वरचतुष्टयं दत्तवती। देवी काली प्रथमवरस्वरूपं तस्मै वदति स्म- "पुत्र! त्वं अतिशक्तिशाली भव" इति।ततः द्वितीयवरस्वरूपं माता काली तस्मै अवदत्--"पुत्र! त्वम् अधिकतरविनयी भव" इति। अनन्तरं तृतीयवरस्वरूपं माता उक्तवती--"पुत्र! त्वं सत्यनिष्ठधर्मपरायणो महाभूभृत् भव" इति। तदनन्तरं चतुर्थवरस्वरूपं माता कथयति स्म- "पुत्र! तव हृदि मां प्रति तव भक्तिः सदा तिष्ठतु" इति।

इत्थं वरान् दत्त्वा देवी स्वप्रतिमामध्ये अन्तर्हिता। ततश्च देवीप्रतिमां प्रणम्य राजकुमारः शुभ्रांशुः स्वगृहं प्रत्यागतवान्। पुत्रे आगते सति अत्यानन्दितः सन् तस्य यौवराज्याभिषेकं कर्तुं धर्मपालः उद्यतः अभवत्। ततश्च धर्मपालः केभ्यश्चिद्दिवसेभ्यः परं शुभ्रांशोः राज्याभिषेकं कारयित्वा तं स्वसिंहासनं प्रतिष्ठाप्य तस्य हस्तयोः स्वराज्यं समुत्सृज्य सन्न्यासाश्रमस्यावलम्बनपूर्वकं सपत्नीकः वनं गतः। अत्र तु कुलदेव्याः काल्याः वरैः आवृतः शुभ्रांशुः सत्यनिष्ठधर्मपरायणः महाराजः सन् न्यायनीतिभिः राजत्वं चकार । स पितृसिंहासनगौरवं वर्धयति स्म। स मन्त्रिवर्गैः प्रशंसितः सन् प्रजापुञ्जैः देवभावेन पूजितः अभवत् इति ।

प्रबन्धः

# दशरूपकम् : एकं संक्षिप्तं समीक्षणम्

## सुरेश-घोषः

आचार्यभरतप्रणीतः संस्कृतनाट्यतत्त्वविषयको विश्रुतः विशालग्रन्थः हि नाट्यशास्त्रम्। नाट्यशास्त्रात्परं सर्वापेक्षया गुरुत्वपूर्णं तथा महार्घनाट्यतत्त्वग्रन्थः हि धनञ्जयरचितः दशरूपकमिति। दशरूपकग्रन्थे आचार्यधनञ्जयस्य विस्तारेण परिचयः न प्राप्यते। स्वकीये ग्रन्थे तेन स्वविषये यत् लिखितं तावन्मात्रमेव वयं जानीमः। अन्यत्र कुत्रापि तद्विषयकतथ्यं नास्ति। धनञ्जयः स्वीयग्रन्थस्य अन्तिमे श्लोके आत्मपरिचयं प्रदत्तवान्-

"विष्णोः सुतेनापि धनञ्जयेन विद्वन्मनोरागनिबन्धहेतुः।

आविष्कृतं मुञ्जमहीशगोष्ठीवैदग्ध्यभाजा दशरूपमेतत्।।" इति।

एवं ज्ञायते यत् धनञ्जयः विष्णोः पुत्र आसीत्। धनञ्जयो हि मालवदेशस्य परमारवंशोद्भवस्य राज्ञः मुञ्जस्य सभायां विशिष्टपण्डितरूपेण समधिकं समादृत आसीत्। राज्ञः मुञ्जस्य नैके उपाधय आसन्। यथा- वाक्पतिः, उत्पलराजः, अमोघवर्षः, पृथिवीवल्लभः, श्रीवल्लभश्चेत्यादयः। मुञ्जनृपतेः शासनकालः स्वीक्रियते ९७४- ९९५ ख्रीष्टाब्दः। अतः पण्डिता मन्यन्ते यद् धनञ्जयस्य स्थितिकालः तथा दशरूपकस्य रचनाकालो दशमख्रीष्टाब्द इति। आचार्यधनञ्जयस्य दशरूपकमतिरिच्य कोऽपि ग्रन्थो न प्राप्यते। विदग्धगोष्ठीपरिवृतराजसभायां काव्यस्य तथा साहित्यानुशीलनस्य अनुकूले परिमण्डले धनञ्जयस्य प्रतिभा विकशिता। तस्य सहोदरोऽनुजः धनिकः। महाराजमुञ्जस्य राजसभां कविरूपेण धनिकोऽपि अलंकृतवान्। धनिकः दशरूपकोपरि स्वोपज्ञामवलोकनाम्नीं वृत्तिं रचितवान्। इमां वृत्तिं विना दशरूपकमपूर्णमिव भाति। इयमवलोकवृत्तिः दशरूपकस्य यादृशं व्याख्यानं कृतवती तादृश्यन्या न काचिदपि टीका । तत्र कारणं हि अवलोकवृत्तिकारः धनिकस्तावत् धनञ्जयस्य भ्राता। पण्डितानामनुमानं यत् ग्रन्थोऽयं परस्परं परामृश्यैव विनिर्मित इति।

दशरूपकग्रन्थे धनञ्जयेन कारिकायां यः विषयः न स्पष्टीकृतः धनिकः तं विषयं स्पष्टीकृतवान्। अतो अवलोकवृत्तिः हि दशरूपकस्य परिपूरिका। तत्प्रमाणं हि दशरूपकस्य प्रथमे प्रकाशे नायकप्रकरणं तथा चतुर्थे प्रकाशे रसप्रकरणम्। धनिकोऽपि विष्णोस्तनय आसीत्।

दशरूपकस्य चतुर्थे प्रकाशे धनिकः स्पष्टमेवोल्लिखति यथा - “इति श्रीविष्णुसूनोर्धनिकस्य कृतौ दशरूपावलोके रसविचारो नाम चतुर्थः प्रकाशः समाप्तः।।” इति।

अवलोकवृत्तिमधीत्य प्रतीयते यत् धनिकोऽभिधावादी आसीत्। स व्यञ्जनां न स्वीकरोति। अतो धनिकः दशरूपकस्य चतुर्थे प्रकाशे रसविचारप्रसङ्गे ध्वनिविरोधं कृतवान्। धनिकः शान्तरसं न स्वीकृतवान्। स नाट्ये अष्टावेव रसान् स्वीकरोति। अवलोकवृत्तिं विहाय धनिकः सौन्दर्यशास्त्रीयं ग्रन्थमपि रचितवान्। तस्य ग्रन्थस्य नाम ‘काव्यनिर्णय’ इति। धनिकः अवलोकवृत्तेः चतुर्थे प्रकाशे काव्यनिर्णयग्रन्थम् उल्लिखितवान्- “यथोवाच मम काव्यनिर्णये ........।।” इति। धनिकः कविरासीत्। तद्विरचितवृत्तौ स क्वचित् क्वचित् स्थाने स्वोपज्ञं पद्यमुदाहरति। स्वकीयं पद्यं द्वितीये प्रकाशे नायकप्रकरणस्योदाहरणत्वेन प्रस्तौति- “यथा ममैव-

प्रसीदत्यालोके किमपि किमपि प्रेमगुरवो
रतिक्रीडाः कोऽपि प्रतिदिनमपूर्वोऽस्य विनयः।
सविश्रन्तुः कश्चित् कथयति न किञ्चित् परिजनो
न चाहं प्रत्येमि प्रियसखि किमप्यस्य विकृतिम्।।” इति।

दशरूपकमधिकृत्य एकाऽन्या टीका समुपलभ्यते ‘लघुटीका’ इति। सा टीका भट्टनृसिंहकृता। दशरूपकस्यान्येऽपि टीकाकाराः श्रूयन्ते न तु प्राप्यन्ते। यथा ‘साहसाङ्कीया टीका’, ‘देवपाणिकृता टीका’ चेति।

दशरूपकस्य चत्वारः प्रकाशाः सन्ति। दशरूपके प्रथमे प्रकाशे ६८, द्वितीये प्रकाशे ७२, तृतीये प्रकाशे ७६, तथा च चतुर्थे प्रकाशे ८६ श्लोकाः, इत्थं सम्पूर्णतया ३०२ संख्यकाः श्लोकाः सन्ति। अथ प्रकाशानुसारं विषयवस्तु उपस्थाप्यते-

प्रथमे प्रकाशे मङ्गालचरणं विधाय दशरूपकस्य निर्माणप्रयोजनमुपस्थापितम्। ततो दश रूपकाणि उल्लिखितानि। रूपकाणां सहायकं नृत्यं नृत्तञ्च संक्षेपत उल्लिखितम्। ‘वस्तु नेता रसस्तेषां भेदकः’ इत्युक्त्या रूपकाणां भेदकतत्त्वानि उल्लिखितानि। वस्तुनो भेदान् पर्यालोच्य तस्य चार्थप्रकृतयोऽवस्थाः पञ्च सन्धयः च स्पष्टतया आलोचिताः। अन्तिमे चार्थोपक्षेपका निरूपिताः।

द्वितीये प्रकाशे नेतृनिरूपणं कृतम्। नेतुः भेदान् निरूप्य तस्य चत्वारो भेदाः सलक्षणं निरूपिताः। एते च धीरोदात्त- धीरप्रशान्त- धीरललित- धीरोद्धताः सन्ति। ततः सभेदं नायिकानिरूपणं कृतम्। अतः परं चतस्रो नाट्यवृत्तयः कौशिकी- सात्त्वती- आरभटी- भारत्यो वर्णिताः। अन्तिमे पात्राणां परस्परं सम्बोधनभेदः निरूपितः।

तृतीये प्रकाशे स्थापनायाः प्रस्तावनायाश्च प्रकाराः सम्यग्रूपेण आलोचिताः। ततो त्रयोदशवीथ्यङ्गानि निरूपितानि। प्रकाशान्ते रूपकाणां ये प्रकरणादयो विभागास्तेषां सलक्षणमुदाहरणञ्च क्रमेण आलोचितम्।

चतुर्थे प्रकाशे धनञ्जयमहोदयो रसनिरूपणं कृतवान्। प्रकाशेऽस्मिन् नाट्यरसस्य स्पष्टं विवेचनं कृतवान्। धनञ्जयो विभावानुभावव्यभिचारिभावानाम् आलोचनं सविस्तरमकरोत्। ततो स्थायिभावस्य स्वरूपवर्णनं कृतवान्। तदनन्तरम् अष्टानां भावानामुल्लेखं विधाय स्थायिभावं शमं निषिध्य धनञ्जयो नाट्ये शान्तरसं नाङ्गीकृतवान्। अत्रैव दशरूपककारो ध्वनिकृताभिमतं व्यङ्ग्यं नाङ्गीकृतवान्। रसस्य भेदान् तत्स्वरूपञ्च विविच्य दशरूपकग्रन्थं समापयामास।

**दशरूपकस्य मौलिकमतानि -**

प्रकरीवृत्तं स्वार्थाय परार्थाय च भवतीति दशरूपककारस्य स्वतन्त्रमतम्।

धनञ्जयः व्यञ्जनावृत्तेः निषेधं करोति।

दशरूपककारस्य मते रसः तात्पर्यार्थः, न तु व्यङ्ग्यार्थः।

धनञ्जयः नाट्ये शान्तरसस्य निषेधं करोति।

दशरूपकपरिवर्तिषु नाट्यशास्त्रीयग्रन्थेषु दशरूपकस्य कश्चित्प्रभावः सुपरिलक्ष्यते। विश्वनाथाचार्यकृतस्य साहित्यदर्पणस्य तृतीये परिच्छेदे यो नायकनायिकाप्रकारो वर्णितः स दशरूपकानुसारी एव। साहित्यदर्पणस्य षष्ठे परिच्छेदे यत् दृश्यकाव्यविवेचनमस्ति तद् दशरूपकानुसारि एव। आचार्यरामचन्द्रगुणचन्द्राभ्यां विरचितः नाट्यदर्पण इति ग्रन्थोऽपि दशरूपकेणानुप्राणितः। ग्रन्थेऽस्मिन् नैकत्र नाट्यवस्तूस्वरूपाणि दशरूपकात् संगृहीतानि। अत्र दशरूपकग्रन्थस्य मौलिकता अपि वर्णितास्ति। एवमेव दशरूपकग्रन्थस्य सर्वातिशायि माहात्म्यमिति शम्।

# तीर्थे तपस्यायां च // सुकुमार-बाग्दी

भगवतः श्रीरामकृष्णस्य शरीरगतेः एकसप्ताहात् परं काशीपुरात् श्रीसारदामाता पूतभस्मना सह वलराम-बोस्-महोदयस्य गृहे आनीता । जन्माष्टमीतिथौ शिष्याः भस्मनः अंशविशेषं राममहोदयस्य काकुडगाछि-नामके योगोद्याने समाधिस्थं कृतवन्तः। घटनामिमाश्रित्य गृहस्थत्यागिनोः भक्तयोः मध्ये मतवैपरीत्यं श्रुत्वा सारदामाता अवदत् यत् 'एतादृशः स्वर्णमनुष्यः गतः, पश्य गोलाप, अधुना भस्म आश्रित्य विवादः' इति ।

भगवतः श्रीरामकृष्णस्य शरीरे गते तस्य प्रत्यक्षतया सेवाधिकारात् वञ्चितायाः सारदामातुः जीवनं दुःसहम् अभवत् । क्वचित् क्वचित् तस्याः मनसि उदेति स्म यत् , 'किं भविष्यति पीडायाः सहनं कृत्वा ? गच्छामि तत्समीपे ' इति । एकस्मिन् दिवसे भगवतः दर्शनं सञ्जातं , तेनोक्तं च 'न , त्वं तिष्ठ , बहूनि कर्माणि अवशिष्टानि सन्ति ' इति ।

भाद्रमासस्य पञ्चदशे दिवसे भक्ताः मात्रा सह वृन्दावनमुद्दिश्य गताः, यदि तत्र तस्याः वियोगव्यथा किञ्चित् प्रशमिता भवेदिति । मात्रा सह योगीन्द्रः , गोलापमाता , लक्ष्मीरपि अगच्छन्। पथि देउघर-काशी-अयोध्यादीनां तीर्थक्षेत्राणां दर्शनं कृत्वा तैः वृन्दावनं प्राप्तम् । व्रजधाम आगत्य मातुः मनसि श्रीराधिकायाः महाविरहभावः आविर्भूतः। अजस्रधारया माता क्रन्दनं कृतवती। कतिपयेभ्यः दिनेभ्यः पूर्वं श्रीरामकृष्ण-कृपाधन्या योगिन्-माता तपस्तमुं तत्रागतवती। सा अपि मात्रा सह क्रन्दनं कृतवती। तदा श्रीरामकृष्णः दर्शनं प्रदाय अवदत् – 'कथं क्रन्दसि इति। तस्मात् परं वारं वारं दर्शनं प्राप्य मातुः मनसि आनन्दः अनूभूतः। बालिकावत् स्वतः आनन्देन मन्दिरं मन्दिरं गत्वा देवादिदर्शनं कृतवती सा । पादयोः व्यथायां सत्यामपि श्रीकृष्णलीलाभूमेः परिक्रमणं कृतवती ।

एकस्यां रजन्यां वंशीध्वनिश्रवणेन राधाराणीभावेन आकुला भूत्वा माता द्रुतगत्या धावति स्म । सैकतभूमिम् अतिक्रम्य यमुनातीरे भूमौ पतिता स्म । सहचारिणः अन्वेषणं कृत्वा तां गृहं प्रति नयन्ति स्म । कालामहोदयस्य कुञ्जे वाससमये माता गम्भीरे ध्याने मग्ना अभवत् यत् तस्याः कर्णविवरे वारं वारं नाम श्रावयित्वा ध्यानभङ्गः करणीय आसीत्। क्वचित् वदने मक्षिकाः तिष्ठन्ति स्म तथापि न अनुभूयते स्म । समयेऽस्मिन् श्रीरामकृष्णः तं दर्शनं प्रदाय योगीन्द्राय दीक्षां प्रदातुमादिष्टवान्। द्वैधीभावात् मात्रा आदेशोऽयं न पालितः। किन्तु वारं वारं तादृशं दर्शनं जातम् । अन्ततो ज्ञातवती यत् योगीन्द्रस्य पूर्वं दीक्षा न जाता । अतः योगीन्द्राय दर्शनं प्रदाय मातुः समीपे दीक्षार्थं गन्तुम् उक्तवान् । तदा द्वैधीभावः गतः ।

एकदा पल्लीवासिनां समालोचनावशात् माता अलङ्कारादीन् परित्यक्तुम् उद्यता , तदा श्रीरामकृष्णस्य दर्शनं जातम्। ज्ञापितञ्च 'मा एवं कुरु। वैष्णवतन्त्रं जानासि खलु ? गौरीदासी आगमिष्यति। तस्याः शृणोतु' इति । सत्यं, तस्मिन्नेव दिवसे गौरीमाता आगता । तदा अलङ्कारादयः तिष्ठन्तु इति तयोपदिष्टम्। यदा विरहव्यथा अधिका भवति तदा भगवान् दर्शनं दत्त्वा तस्याः दुःखं दूरीकरोति स्म । जननी श्यामासुन्दरी कन्यकां जयरामवाट्यां नेतुमिष्टवती, किन्तु कतिपयेभ्यः दिनेभ्यः परं सा आगतवती ।

श्रीरामकृष्णस्य शिष्याः तदा तस्य वियोगात् वैराग्यात् च तीर्थे तीर्थे तपस्यायां रताः। ते न जानन्ति स्म यत् कथं माता दिनं यापयति स्म । गृहस्थाः भक्ताः तां श्रीरामकृष्णस्य सहधर्मिणीरूपेण जानन्ति स्म। अतः कदापि तस्याः सेवाभावं न गृहीतवन्तः । तासां नैकाः तदानीमपि मातरं समीचीनतया न जानन्ति स्म । त्यागिनः शिष्याः यदा लोक-मुखात् मातुः अवस्थां ज्ञातवन्तः तदा ते मातरं कलिकाताम् आनेतुम् उद्यताः अभवन् । योगानन्दस्वामी मातुः सेवायाम् आत्मनियोगं कृतवान् इति ।

कथा

# का विचारणा

**अभिषेकदासः**

अद्य दशमी तिथि: | शारदीयाया: अन्तिमदिवसे प्रकृतेरङ्गने आनन्दधारा प्रवहमाना | भूस्वामिन: गृहे तु शोकच्छाया समुपस्थिता | कियत्पूर्वं पूजा समाप्ता जाता | दुर्गोत्सवस्य प्रारम्भे ईदृशी दशा नासीत् | प्रथानुसारम् उत्सवस्य प्रस्तुतिरासीत् महार्घा | प्रतिवत्सरमिवास्मिन् वत्सरेऽपि सर्वत्र कुशलमासीत् | परन्तु सन्धिपूजाया अवसरे दुर्घटना संघटिता |

भूस्वामिन: रतिकान्तस्य भूयसी प्रशंसा सर्वत्र श्रूयते| तस्य महिषी भुवनमोहिनी देवी देवद्विजभक्तिपरायणा अशेषसौन्दर्यपरायणा च| प्राचुर्यसत्त्वेऽपि बहुकालं यावत् सा आसीत् नि:सन्ताना|

अत:परं कृतबहुपरिश्रमाया: तस्या: एक: पुत्र: अजायत| स पुत्र: सर्वेषां नयनमणितुल्य आसीत्| चन्द्रकलावत् स बर्धितोऽभवत्| यदा स अष्टमवर्षीय: तदा स प्रकृत्या चञ्चल आसीत्| अनेन प्रकारेण वर्षद्वयमतिक्रान्तम| एकदा कश्चन पुरुष: छागशिशुविक्रयार्थमागतवान् भूस्वामिगृहम्| दैवात् छागशिशुना सह क्रीडत: रोहितस्य सख्यमजायत| भूस्वामिसुतस्य रोहितस्य इच्छया भूस्वामी तं क्रीतवान्| रोहित: तं मित्रमिति सम्बोधयति| छागशिशुना सह रोहितस्य सख्यता प्रतिदिनं क्रमेण वर्धिता| रोहित: प्रत्यहं तस्मै स्वहस्तेन पेयचर्व्यादिकं प्रयच्छति| स तस्मिन् स्निह्यति अतीव| कुत्रापि कोऽपि संकट: नासीत्|

अस्मिन्वर्षे दुर्गापूजाया: पूर्वं संकट: प्रकटीभूत:| पूजानुष्ठानकाले मातृसकाशे बलिदानार्थं दोषरहितच्छागत्रयस्य आवश्यकता वर्तते| तत्र सप्तमीत: नवमीं यावत् तिथित्रये निर्दिष्टस्य शिशुछागत्रयस्य उत्सर्गीकरणं भवेदिति मन्त्रितम् | वलिदानाय वत्सरेऽस्मिन् आसादितौ द्वौ छागशिशू| तृतीयस्य छागशिशो: लाभाय महती प्रचेष्टा चलति, किन्तु न सफला भवति|

भूस्वामिन: गृहे वयोवृद्धानां सभा समायोजिता | तत्र विकल्पव्यवस्था कापि न समासादिता| ग्रामप्रधानानां परामर्शक्रमेण गृहस्थछागशिशु: एव बध्य इति स्थिरीकृतम्| अयं छागशिशु: रोहितस्य मित्रमिति तस्य बधे भूपतिपत्न्या: मतिर्नासीत्| किन्तु एतेन प्राचीनपरम्परायाः व्यत्ययो भवितुमर्हति| अपि च, देवप्रकोपेन सांसारिकजीवनेषु तथा राज्यमध्ये विशृंखला आपतेत् इति घोरतरा चित्रा जाता| अत:परं सार्विककल्याणाय भूस्वामी इमां परिकल्पनां ग्रहीतुं सम्मतोऽभवत् |

भूस्वामिना अस्य छागशिशो: बधः अंगीकृतः| रोहिते निद्रिते सति सन्धिक्षणावसरे देवीमुद्दिश्य छागोऽयं उत्सर्गीकृत: स्यादिति सर्वे आमनन्ति स्म| परिकल्पनानुसारं पूजाकार्यं शीघ्रं सम्पन्नं भवति स्म| सन्धिपूजावसरे वाद्ययन्त्रनिनादेन सर्वा दिशः मुखरिता: जाताः| छागश्च रक्तसिन्दुरपुष्पै: सज्जीकृत्य पूजास्थानमानीत:| पुन: पुन: उच्चै: स आसन्नसंकटमनुभूय स्वजीविताावनाय प्रार्थयति| अहो! का कस्य परिवेदना इयम्| तस्य चेष्टा वृथा जाता| निमेषपञ्चकात्परं बलपूर्वकं देव्या: सकाशे पूजकै: छागा हता:| तेषां शोणितधारया मेदिनी रक्तवर्णेन रञ्जिताभवत्|

निद्रोत्थित: सन् कस्यचन छागस्य गगनविदारकार्तनादम् आकर्णयतो रोहितस्य मनो दु:खेन सम्भिन्नं जातम्| अतःपरं तेन चिन्तितं यत् किमेष तस्य बन्धोः कण्ठरव:? न न...एवं भवितुं नार्हति| एवं विचिन्त्य स पूजास्थानं द्रुतमधावत्| द्वौ भृत्यौ तं बाधितुं तमनुधावितवन्तौ| स यदा पूजास्थानम् उपस्थितोऽभवत् तदा स दृष्टवान् तस्य मित्रस्य द्विखण्डितं शरीरम् | शरीरात् विच्छिन्ने मुण्डे निविष्टम् अनिमीलितचक्षुर्द्वयं शून्यदृष्ट्या तं पश्यति| विस्मयाविष्ट: रोहित: किञ्चित्परं तस्मिन् स्थाने अचैतन्यावस्थां संप्राप्त:| तं क्रोडीकृत्य अन्त:पुरमानीतवन्त: सर्वे| कोलाहलविच्छिन्नश्च उत्सव:| अस्मिन् उत्सवे क्षणादेव विषादच्छाया विस्तीर्णा| अत:परं चिकित्सका: समागता:| तेषां महता यत्नेन चेतना प्रत्यागता| परन्तु तस्य मुखाद् वाक् न स्फुरिता आसीत्| तस्य सत्यामपि वाचि वागधिष्ठात्री देवी अपगतेति चिकित्सकानां मतिः। हा! एकस्या: देव्या: सन्तोषाय अपरा देवी दूरीकृता इति का विचारणा?

प्रबन्धः

# आयुर्वेदशास्त्रं वर्तमानजीवनञ्च

नवकुमाररायः

विश्वस्य प्राचीनतमा , हृद्या , निरवद्या , सकलै: अपेक्षितै: संस्कारै: सम्पन्ना , काव्यकोषव्याकरणादि-सर्वाङ्गै: समन्विता अनादिकालतः काले काले परमात्मनावतीर्य संरक्षिता महद्भिर्गौरवैर्मण्डितास्ति संस्कृतभाषा| संस्कृतभाषाया उपयोगिता एतस्मात् कारणात् वर्तते यत् एषैव सा भाषा अस्ति यतः सर्वासां भारतीयानाम् आर्यभाषाणाम् उत्पत्तिः वभूव | सर्वासाम् एतासां भाषाणाम् इयं जननी | सर्वभाषाणां मूलरूपज्ञानाय एतस्या आवश्यकता भवति | विपुले अस्मिन् संस्कृतवाङ्मये मानवजीवनस्य संरक्षणाय , संवर्धनाय कल्याणाय च सर्वे अपि विषयाः अस्माकं मुनिभिः शास्त्रकारैश्च सविस्तरं निरूपिताः सन्ति | 'मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः' इति अमरसिंहस्य नामलिङ्गानुशासने ज्ञानविज्ञानयोः भेदः स्पष्टीकृतः वर्तते | तत्रापि यस्मिन्नर्थे आङ्गलभाषायां 'Science' इति शव्दः प्रयुज्यते तस्मिन्नेवार्थे अत्र 'विज्ञान'शव्दस्य प्रयोगः विहितः अस्माभिरधुना | भौतिकशास्त्रं , रसायनशास्त्रं , वनस्पतिशास्त्रं , प्राणिशास्त्रं , गणितशास्त्रं , संगीतशास्त्रं , कामशास्त्रं , शिल्पशास्त्रम् , आयुर्वेदशास्त्रम् इत्यादीनि शास्त्राणि अद्यत्वे 'विज्ञान'-पदवाच्यानि भवन्ति | भूमण्डले अस्मिन् अन्यदेशेभ्यः प्रागेव भारतवर्षं चिकित्साविज्ञानक्षेत्रे समुन्नतपदमारूढम् आसीदिति इतिहासविदां मतम् | मानवस्य ऐहिकामुष्मिकफलसाधनार्थम् आरोग्यमेव प्रधानम् | आरोग्यसाधनं तु आयुर्वेदाध्ययनादेव इति कारणात् मुलभूतमिदं आयुर्वेदविज्ञानम् |

'शरीरं व्याधिमन्दिरम्' – शरीरावच्छेदे एव रोगाणाम् उत्पत्ति: | व्याधिनिवृत्त्यर्थं चिकित्साशास्त्रस्य विविधा: सम्प्रदाया: स्व-स्वभूमिका: दृढीकुर्वन्ति | एतन्मध्ये आयुःसम्पर्कितविविधतथ्यानां शास्त्रम् 'आयुर्वेद:' इति नाम्ना अभिधीयते | अथर्ववेदस्य भैषज्यायुष्यपौष्टिकमन्त्रानां मध्ये निहितमस्ति आयुर्वेदस्य बीजम् | स्वास्थ्यरक्षणे आयुर्वेदस्य प्राधान्यमभिलक्ष्य आयुर्वेद: अथर्ववेदस्य उपवेदत्वेन प्रथितः | मतमिव चरक-सुश्रुत-वागभटादिभि: प्रमुखायुर्वेदाचार्यै: एव प्रकशितम् | व्यखानकार: चक्रपाणि: अपि एवं वदति -

"आयुर्वेदस्य आयुर्वेदत्वमुक्तं भवति , अथर्ववेदैकशेष एव आयुर्वेद:" इति |

'आयुर्वेद'-शब्दस्य व्युत्पत्तिं साधयद्भिराचार्यै: प्रकटितम् - "आयुरस्मिन् विद्यते, अनेन वा आयुर्विन्दति" इति | 'भावप्रकाश'-टीकाकारोऽपि 'आयुर्वेद'-शब्दम् एवं विशदीकरोति -

"अनेन पुरुषो यष्माद् आयुर्विन्दति वेत्ति च |
तस्मान्मुनिवर एष 'आयुर्वेद' इति स्मृत: ||"

चिकित्साशास्त्रस्य शाखाया आयुर्वेदस्य इतिहासः वैदिककालादेव आरभ्यते | अतः पञ्चसहस्रवर्षेभ्योऽपि प्राचीनोऽयं इतिहासः | विशेषतः ख्रीष्टपूर्वचतुर्थशतकादारभ्य ख्रीष्टपूर्वैकादशशतकपर्यन्तम् आयुर्वेदस्य

उत्कृष्टपरम्परा न केवलं प्रचारे आसन् अपि तु तत्कालीनेषु प्रख्यातेषु नालन्दा , विक्रमशीला , वलभी इत्यादिषु विश्वविद्यालयेषु प्रमुखविषयत्वेन पाठ्यन्ते स्म | भारतीयैः सह विदेशिकच्छात्रा अपि अस्य प्रयोजनं अनुभूतवन्तः।

आयुर्वेदानुसारेण आयुः चतुर्विधम् - हितायुः , अहितायुः , सुखायुः दुःखायुश्चेति | चरकसंहितायामुक्तं यत् -

" हिताहितं सुखं दुःखमायुस्तस्य हिताहितम् |

मानं च तच्च यत्रोक्तमायुर्वेदः स उच्यते || " (च. स. सू. ३.४१)

मानसिकशारीरकरोगरहितस्य ज्ञानिनः सुदृढवतः मानवस्य आयुः सुखायुः | एतद्विपरीतं दुःखायुः | अरिषड्वर्गविजितस्य सर्वभुतहिते रतस्य आयुः हितायुः | तद्विरोधे अहितायुः भवति | आयुर्वेदेन त्रयः दोषाः उक्ताः| ते हि वातः , पित्तम्, कफश्चेति | आयुर्वेदे षड्रसाः अपि भवन्ति | ते हि मधुरः, कटुः, अम्लः, तिक्तः, कषायः, लवणः चेति |

संस्कृतसाहित्ये आयुर्वेदशास्त्रमवलम्ब्य वहवः ग्रन्थाः रचिताः| चरकाचार्यविरचिता 'चरकसंहिता', सुश्रुताचार्यप्रणीता 'सुश्रुतसंहिता', वाग्भटग्रथितम् 'अष्टाङ्गहृदयम्', माधवकरस्य 'माधवनिदानम्', शाङ्र्गधरस्य 'शाङ्र्गधरपद्धतिः' इत्यादयः आयुर्वेदस्य प्रमुखाः ग्रन्थाः | चरकसंहितायां ३४१ शस्यजन्यद्रव्याणाम् , १७७ प्राणिजन्यद्रव्याणाम् , ६४ खनिजद्रव्याणां च उल्लेखः अस्ति | ग्रन्थस्यास्य महत्वम् अभिलक्ष्य अस्य नैकानि व्याख्यानानि रचितानि | चरकसंहितायाम् ८ स्थानानि सन्ति | मूलतः एषा अग्निवेशेन रचिता संहिता | तत्र चरकमहर्षिणा प्रतिसंस्कारः कृतः | ततः दृढबलनाम्ना अपरेण वैद्येन सम्पूरणं कृतम् | एवम् अद्य उपलब्धायां चरकसंहितायाम् एषाम् त्रयाणां कर्तृत्वं विद्यते | आयुर्वेदस्य तत्त्वानि वेदेषु अन्यान्येषु स्थानेषु निहितानि आसन् | सुश्रुतः तानि सर्वाणि तत्त्वानि एकत्रीकृत्य स्वानुभवान् अपि योजयित्वा 'सुश्रुतसंहिता' इत्याख्यं ग्रन्थम् अलिखत् | तस्मिन् ग्रन्थे ११२० रोगाः , तेषां रोगाणां कारणानि , तदनुगुणं करणीयाः औषधोपचाराः विभागश्च विवृताः सन्ति | स 'सुश्रुतसंहिता'-ग्रन्थ इदानीं वहुभिः भाषाभिः अनूदितः अस्ति | इयम् 'अष्टाङ्गहृदयम्' नाम्नी एका कृतिः | अस्याः कृतेः रचयिता अस्ति वाग्भटः | इयं कृतिः आयुर्वेदसम्बद्धा अस्ति | अस्मिन् पुस्तके शस्त्रचिकित्सा तथा औषधोपचारसम्बद्धाः विषयाः निरूपिताः सन्ति | चरकसंहिता-सुश्रुतसंहिता-अष्टाङ्गहृदयमित्यादयः ग्रन्थाः बृहत्त्रय्याम् अन्तर्भुक्तानि | एतद् व्यतिरिच्य आयुर्वेदशास्त्रान्तर्भुक्ताः सर्वे ग्रन्थाः वर्तमानजीवने गुरुत्वपूर्णमासन् |

आयुश्च शरीरेन्द्रियसत्तासंयोगः | इत्थं हि शरीरं तु नानाविधव्याधिनाम् आगारमेव | अतः व्याध्युपसृष्टानां व्याधिपरिमोक्षः , सुस्थस्य स्वास्थ्यरक्षणं च आयुर्वेदस्य द्वे प्रयोजने | एतद् व्यतिरिच्य वर्तमानजीवने आयुर्वेदस्य विविधप्रभावाः परिलक्ष्यन्ते –

१. मूत्रपुरीषयोः निरोधे सति चर्मशलाकया लोहशलाकया वा शल्यक्रिया, गण्डमालाभैषज्यप्रसङ्गे , दुष्करप्रसवप्रसङ्गे च क्रियमाणाः प्रभूताः शल्यक्रियाः शस्त्रक्रिया वा वर्तमानजीवने परिलक्ष्यन्ते।

२. ग्रीवाया: उपरिभागस्य आन्तरिकचिकित्सा शलाक्यान्तर्भूता | चक्षुःनासागलश्रोत्रमुखसम्बन्धिरोगाणां निवारणोपायाः अस्मिन् शलाक्यतन्त्रे दृश्यते | वर्तमाने शिररोगकेशरोगाणां निवृत्तौ नानाविधोपचाराः शलाक्यचिकित्सायां समुपलभ्यन्ते | सर्वदा केशवर्धनं , तेषां कृष्णत्वं सौन्दर्यं च रक्षितुं शलाक्यतन्त्रस्य उपयोगिता अपरिसीमा |

३. दैनन्दिनजीवने मानवेषु विविधशारीरिकरोगाणां लक्षणं परिदृश्यते | शरीरोदररोगाः ज्वरयक्षपक्षाघात-स्रावजलोदरोदरशुलवातपित्तकफादयो न च एकविधाः | अन्यदपि हृद्रोगपाण्डूदरशुलतृषितत्वादीनां रोगाणां निवृत्तये कायचिकित्सायाः महत्त्वम् अतूलनीयम् |

४. मानसरोगान्तर्भुक्ताः वहवो मानवाः प्रात्यहिकजीवने परिदृश्यन्ते | मनसि रजस्तमोगुणेषु आवृतेषु सत्सु उन्माद-अपमार-अतत्त्वाभिनिवेशः इत्यादिरोगानां निरामये भूतविद्याचिकित्सायाः गुरुत्वं सर्वजनस्वीकृतम् | भुतविद्यायां सुप्तसम्मोहनादिविधानेन एषां रोगाणां चिकित्सा एव भवितुमर्हति | तथैव यक्षपिशाचासुर-नागादिदुष्टसमाविष्टचित्तानां च व्यक्तीनां चिकित्सा भूतविद्यया भवति | विविधयन्त्रमन्त्रमणीनां प्रयोगः अत्र कार्यः भवति |

५. वर्तमानजीवने वहवः शिशवः विविधरोगाक्रान्ताः भवन्ति | तेषां रोगमुक्ताय चिकित्सा कौमारभृति-विद्यायाम् एव भवितुम् अर्हति |

६. सर्प-कीट-वृश्चिक-प्रभृतीनां विषसम्पर्कीयज्ञानार्जनाय अपि च सर्पादिदंशनजनित-व्याधिप्रशमनाय वर्तमानजीवने अगदतन्त्रस्य महत्त्वम् अतूलनीयम् |

७. अस्त्रचिकित्सायाः प्रसङ्गे केवलधातूनां प्रयोगात् , तद्यथा - गन्धकाभ्र-ताम्र-स्वर्ण-हीरक-सीसाप्रभृतीनां संमिश्रणजरसौषधिप्रयोगात् विविधरोगेभ्यो मुक्तिः एव सम्भवेत् यदावेदितम् आयुर्वेदस्यान्यच्छाखायां रसायनशास्त्रे | वर्तमानजीवने वहबः मानवाः एतदुपायेन रोगमुक्ता भवन्ति।

८. सम्प्रति कोविड-१९जीवाणुजः 'करोना'-इति नाम्ना प्रसिद्धः भयङ्कररोगः विश्वमानवसंसारे अशुभच्छायाम् उत्सृजति | अस्य भयङ्करप्रभावेन वहवः मानवाः मृताः | कोविड-१९-संक्रमणस्य प्रथमसूचना चीनदेशात् अजायत | भारतवर्षे अस्य प्रथमप्रभावः परिलक्ष्यते केरलराज्ये २०२० वर्षस्य जानुयारीमासस्य त्रिंशत्तमदिवसे| नभेम्बरमासस्य षड्-विंशतिदिवसपर्यन्तं भारतवर्षे ९२,६६,७०५-संख्यका जनाः कोविड-१९-रोगाक्रान्ताः भवन्ति | एतेषां मध्ये सुस्थव्यक्तीनां संख्याः – ८६,७९,१३८ ; अपि च मृतव्यक्तिनां संख्याः - १३,५,२६१ |

भारतवर्षस्य प्रधानमन्त्रिणो नरेन्द्रमोदिमहोदयस्य निर्देशेन समग्रभारते २०२० ईशवीयाब्दस्य मार्चमासस्य द्वाविंशदिवसे पूर्णतया निरोधः 'जनताकार्फु' इति आयोजितः अभवत् | तत्परं पुनः पुनः संक्रमितनगरे निरोधः आयोजितः अभवत् | निरोधकारणात् अर्थनैतिक-सामाजिक-धार्मिक-शिक्षा-व्यवसा-यातायातव्यवस्थासु शोचनीया परिस्थितिः परिदृश्यते | चिकित्साशास्त्रस्य विविधशाखाः 'करोना'इति भयङ्कररोगात् मुक्तिलाभाय औषधनिर्माणे सदा प्रचेष्टारताः| चिकित्सकाः , गवेषकाः , सेविकाः सर्वदा रोगमुक्तये देशरक्षणाय च आत्मानम् उत्सृजन्ति | चिकित्साशास्त्रस्य आयुर्वेदशाखा 'करोना 'इति रोगमुक्तिलाभाय औषधनिर्माणे सदातत्परा भवति |

चिकित्सा काचित् अत्यन्तं वैयक्तिकप्रक्रिया विद्यते | अन्यस्य जनस्य चिकित्सा समाना न भवति | सामान्य-विशेषयोः अयं समन्वयः चरकस्य वैशिष्ट्यं वर्तते | प्रत्यक्षानुमानप्रमाणादिभिः रोगिणः परीक्षां कृत्वा ज्ञात्वा तथ्यानाम् आधारेण चिकित्सा कर्तव्या | औषधं रोगस्य निवारणाय न दीयते अपि तु प्रकृत्याः अनुकूलतायै एव दीयते इति स्पष्टतया कथयति चरकः | अतः चरकस्य चिकित्सा प्राकृतिकचिकित्सा | तेन उक्तः स्वभावोपरमवादः प्राकृतिक-चिकित्सायाः मूलम् | रोगस्य प्रतिषेधः, व्याधिनिवारणम् इत्येतैः सह महर्षीणाम् अवधानं दीर्घायुष्ये आसीत् | अत एव चरके औषधानि विहाय आचार-रसायनविषये एव प्राधान्येन प्रयतनं विहितम्। आचारपालनं विना औषधसेवनं व्यर्थमेव इति तस्य अभिप्रायः | तेन लिखितं सद्वृत्तप्रकरणम् अत्युत्तममस्ति | चरकः आयुर्वेदद्रव्यगुणान् वैज्ञानिकाधारभुमिकायां प्रतिष्ठापयति | द्रव्यविषये षण्णां पदार्थानां निरूपणं कृतवान् | द्रव्याणां रचनानुसारं कर्मानुसारञ्च वर्गीकरणम् प्राथम्येन चरकसंहितायां प्राप्यते | रोगाणां निवारणकलाकौशले शस्त्रविद्या एव प्रथमा , श्रेष्ठा , परिशुद्धा च इति दृश्यते सुश्रुतसंहितायाम् | एषा शस्त्रविद्या भूलोके कीर्तिसम्पादनस्य साधनम् अपि | अष्टाङ्गहृदये वाग्भटः गद्यपद्यसंमिश्रणेन चरकसंहिता-सुश्रुतसंहिता-भेलसंहितानां विषयवस्तु एकत्रीकृतवान् |

जीवनस्य लक्ष्यपूरणाय मुलं प्रयोजनम् - सुस्वास्थ्यं निरोगशरीरं च | स्वास्थ्यहीनता रुग्नता च जीवनसंग्रामे पराजयस्य मूलकारणम् | चरकसंहितायामपि उक्तम् -

" धर्मार्थकाममोक्षाणमारोग्यं मूलमुत्तमम् |
रोगास्तस्यापहर्तारः श्रेयसो जीवितस्य च || " (च. स. सू. - १.१४)

सम्प्रति 'करोना'नामकभयङ्कररोगस्य मुक्तिलाभाय आयुर्वेदिकौषधादीनाम् आविष्कारः आस्माकं जीवने किञ्चित् शन्तिवार्तां शुभवार्ताम् आनन्दवार्तां च आनयति | विविधरोगाणां कारणं तथा तत्प्रतिकाराय विज्ञानसम्मतोपायो वर्णितोऽस्ति आयुर्वेदशास्त्रे | सर्वोपरि शरीरनिर्माणकारिणो धातुसमूहस्य साम्यावस्थाम् आनीय रोगमुक्तिलाभाय वर्तमानजीवने आयुर्वेदशास्त्रस्य भूमिका अनस्वीकार्या | चरकसंहितायां तदपि वर्णितम् -

" इत्युक्तं कारणं कार्यं धातुसाम्यमिहोच्यते |
धातुसाम्यक्रिया चोक्ता तन्त्रस्यास्य प्रयोजनम् || " (च. स. सू. - १.५३) इति शम्।

कथा

# गुरुभक्तेः माहात्म्यम्

### अर्घ्य - गुप्तः

"वन्दे बोधमयं नित्यं गुरुं शङ्कररूपिणम् ।
यमाश्रितो हि वक्रोऽपि चन्द्रः सर्वत्र वन्द्यते ॥"

भारतीयसमाजे श्रीगुरोः स्थानम् अत्युच्चं भवति। भारतीयाः मन्यन्ते श्रीगुरुः ईश्वरस्य साक्षात् विग्रहस्वरूपम्। आरुणेः तथा एकलव्यस्य गुरुभक्तिः अतूलनीया एव। गुरुपरम्परया एव सनातनधर्मस्य विविधानि तत्त्वानि जगति प्रचलितानि। वैदान्तिकसम्प्रदायेषु श्रीरामानुजाचार्य्यस्य श्रीसम्प्रदायः अन्यतमः। **'श्रीसम्प्रदायः'** इति नामकरणे अपि एकस्या महिलायाः गुरुभक्तेराख्यानं प्राप्यते।

एकदा श्रीरामानुजः बहुशिष्यपरिवृतः सन् तिरुपतितीर्थक्षेत्रं प्रति अगच्छत्। वैष्णवाः विश्वसन्ति यत् तिरुपतिक्षेत्रं तु भूवैकुण्ठस्वरूपम्। अष्टसहस्रम् इति ग्रामे रामानुजस्य शिष्यः श्रीवरदाचार्य्यः प्रतिवसति। स तु अत्यन्तः दरिद्रः आसीत्। पथिमध्ये अष्टसहस्रग्रामः आगतः। श्रीरामानुजः मनसि अचिन्तयत् यदद्य अहं श्रीवरदाचार्य्यस्य गृहं गमिष्यामि। मां दृष्ट्वा स अत्यन्तः आह्लादितः भविष्यति। वरदाचार्य्यस्य गृहाङ्गने एकः कार्पासवृक्षः (तन्तुवृक्षः इति) अस्ति। तथाहि सर्वे तं 'कार्पासरामः' इति वदन्ति। वरदाचार्य्यस्य पत्न्याः नाम आसीत् लक्ष्मीः इति। सा तु परमरूपवती आसीत्। यदा रामानुजः वरदाचार्य्यस्य गृहमागतः तदा स भिक्षार्थं बहिर्गतः। लक्ष्मीः तु स्नानार्थं स्नानागारं गतवती। तस्याः सविधे एका छिन्ना शाटिका विद्यते। सा मनसि अचिन्तयत् – 'छिन्नां शाटिकामिमां परिधाय अहं केन प्रकारेण बहिर्गच्छामि? तदा सा उच्चैः स्वरेण उक्तवती – 'गुरुदेव! अहं स्नानागारे अस्मि|'

श्रीरामानुजः तस्याः दुरवस्थायाः अनुधावनं कृत्वा स्वस्य उत्तरीयं तमुद्दिश्य निक्षिप्तवान्। रामानुजप्रदत्तम् उत्तरीयं परिधाय लक्ष्मीः बहिः आगतवती। सा सानन्दं गुरुसेवाम् अकरोत्। तयोः गृहस्य सन्निकटे एकः वणिक् तिष्ठति। स लक्ष्मीम् अतीव कामयते। कामातुरः वणिक् सर्वदैव चिन्तयति केन प्रकारेण अहं लक्ष्मीं प्राप्स्यामि। परन्तु लक्ष्मीः पतिव्रता नारी आसीत्। तथाहि वणिजः आशा कदापि पूर्णा नाभवत्। लक्ष्मीः चिन्तितवती - 'श्रीगुरुदेवः अद्य स्वयम् अस्माकं गृहे समागतः। परन्तु अहो दौर्भाग्यम्! मम समीपे पर्याप्तपरिमाणं तण्डुलादिकं नास्ति येन अहं गुरुसेवां कर्तुं शक्नोमि|' लक्ष्मीः ईश्वरस्य सविधे प्रार्थितवती – 'हे भगवन्! मार्गं निर्देशय। किम्प्रकारेण अहं गुरुसेवां करोमि?" तदा सा मनसि अचिन्तयत् - किं न अहमधुना वणिजः सविधे गच्छामि? स अवश्यमेव मम साहाय्यं करिष्यति। ततः लक्ष्मीः

वणिजः गृहं गत्वा उक्तवती - 'भो वणिक्! श्रीगुरुदेवः सशिष्यो अस्माकं गृहमागतः। परन्तु मम समीपे पर्याप्तपरिमाणं तण्डुलादिकं नास्ति। भवान् मां गुरुसेवार्थं तण्डुलादिकं प्रयच्छतु। अद्यैव सायंकाले अहं तव कामनानिवृत्त्यर्थं पुनः तत्समीपे आगच्छामि |'

गृहं गत्वा लक्ष्मीः वणिक्प्रदत्तसामग्रीसहायेन उत्तमं भोज्यं प्रस्तूय गुरुसेवां कृतवती। कार्पासरामः गृहमागत्य विस्मयविमूढः सञ्जातः। लक्ष्मीः पत्युः सकाशे सर्वं वृत्तान्तं वर्णितवती। सर्वं श्रुत्वा वरदाचार्य्यः अवदत् – 'लक्ष्मि! अहो सौभाग्यवान् अहम्। येनाहं त्वां भार्यारूपेण प्राप्तः। परन्तु अहमपि त्वया सह वणिग्गृहं गच्छामि|' सन्ध्या समागता। पत्या सह लक्ष्मीः वणिग्गृहम् आगतवती। सा वणिजमुद्दिश्योवाच - 'वणिङ्महोदय! गृह्णातु श्रीगुरोः चरणामृतं प्रसादञ्च|' अहो खलु श्रीगुरोः प्रसादस्य महिमा। कन्दर्पशराहतस्य वणिजः हृदयेऽपि भक्तिभावः सञ्जातः। सः अश्रुपूर्णनेत्रविशिष्टः सन् लक्ष्म्याः सम्मुखे उपविष्टः प्रत्युवाच – 'मातः! क्षमस्व माम्। अहं कामातुरः वणिक्। नाहं जाने गुरुसेवायाः माहात्म्यम् |' । तदा तान् अन्विषन् श्रीरामानुजोऽपि तत्र समागतः। सर्वमेव वृत्तान्तं विदित्वा श्रीरामानुजाचार्य्यः उवाच – 'अम्ब! अहं भूवैकुण्ठं श्रीतिरुपतितीर्थक्षेत्रं गमिष्यामि। परन्तु त्वं तु साक्षात् वैकुण्ठेश्वरी महालक्ष्मीः। धन्या खलु तव गुरुभक्तिः।' लक्ष्मीरुवाच - 'गुरुदेव! सर्वं तवाशीर्वादेनैव सम्भवति|' श्रीरामानुजः उक्तवान् – 'लक्ष्मि! विष्णुप्रियायाः भगवत्याः कमलायाः नामान्तरम् अस्ति श्रीः। अद्य प्रभृति मम सम्प्रदायस्य नाम भवतु 'श्रीसम्प्रदायः'। यावत् चन्द्रदिवाकरौ स्थास्यतः तावत् तव नाम स्थास्यति|'

एकलव्यः गुरोरादेशं शिरोधार्यं कृत्वा स्वकराङ्गुलिं छिन्नवान्। परन्तु गुरुसेवार्थं लक्ष्म्या यत् कृतं तत्तु अविस्मरणीयमेव।

अवतारवरिष्ठेन भगवता श्रीरामकृष्णपरमहंसदेवेन उक्तम् – "जगति सर्वेषां नारीणां मध्ये महादेव्याः प्रकाशः विद्यते, परन्तु शुद्धस्वभावाः नार्य्यः तु साक्षात् भगवत्याः अंशस्वरूपा एव|"

तर्हि वयं सर्वे प्रार्थयामः

"या देवी सर्वभूतेषु लक्ष्मीरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः||"

अपि च,

"अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ||" इति शिवम् ।

पद्यानि

# स्नेहः

विमलरक्षितः

संसारसारः खलु विश्वनाथ
एकोऽपि सन् यो बहुरूप एव।
तथापि लोके बहुभेदनाशिन्
स्नेह!त्वमेकोऽखिलजीववासी।।१।।

मातुर्हृदङ्के सुचिरं शयानः
सुतं समाकर्षसि पाशशून्यः।
विनैव चेष्टां हृदये सचेष्टः
स्नेह!त्वमेव सुतपो जनानाम् ।।२।।

भीमेऽप्यभीमाचरितं हि यस्य
सोऽयं महानप्यणुजीवचारी।
चरश्चरेष्वप्यचरो नराणां
विभावनाक्तं कुरुषे हि चेतः।।३।।

चूर्णेषु पिण्डीभवनं हि लीलां
तवैव काश्चित्किल ये वदन्ति।
विचित्रलीलास्तव नैव वीक्ष्य
दृष्ट्या विहीनाः खलु ते बभूवुः।।४।।

विधातुरिह वैचित्र्यात्स्नेहश्च क्वचिद्विपरीतकारी।
वाजसुतक्षुधाहरो मीनबालवपुर्विदारकः।।५।।

प्रबन्धः

# पुरुषार्थचतुष्टयम्

बुद्धदेवदासः

पुरुषैः अर्थ्यन्ते प्रार्थ्यन्ते वा इति पुरुषार्थाः। पुरुषस्य अर्थः(प्रयोजनम्) पुरुषार्थः इति वा स्यात् निरुक्तिः। प्रसिद्धतया धर्मः, अर्थः, कामः, मोक्षश्चेति भेदात् चत्वारः पुरुषार्थाः भवन्ति। परन्तु मतभेदेन पुरुषार्थानां सङ्ख्याभेदः जायते। केषाञ्चित् मते मोक्षं विहाय अन्ये त्रयः पुरुषार्थाः भवन्ति। अन्येषाञ्च मोक्षः एव पुरुषार्थः। रामचरितमानसकारमते भक्तिः अपि पञ्चमः पुरुषार्थः। तथापि प्रसिद्धतया चत्वारः अपि पुरुषार्थाः सर्वैः ज्ञायन्ते। यथा अग्निपुराणे "धर्म्मार्थकाममोक्षाश्च पुरुषार्था उदाहृताः"। प्रत्येकं पुरुषार्थम् अधिकृत्य भिन्नानि शास्त्राणि, भिन्नाः सम्प्रदायाः, भिन्नाः नियमाः, भिन्नानि च लक्ष्याणि भवन्ति। यथा धर्मशास्त्रम्, अर्थशास्त्रं, कामशास्त्रं तथा मोक्षशास्त्रम्।

चतुर्षु पुरुषार्थेषु धर्मः विषयभोगस्य नियमनं करोति। कुत्रचित् कर्तव्यस्य विधानं करोति, कुत्रचिच्च अकर्तव्यस्य निषेधं करोति। यतो हि धर्ममूलं भवति वेदः, अतः वेदे एव प्रथमतया धर्मस्य विधिनिषेधरूपता दृश्यते। स एव विधिनिषेधरूपः धर्मः स्मृतिग्रन्थे नवीकृत्योच्यते। धर्मस्य विषयाः भवन्ति अर्थः, कामः तथा कदाचित् मोक्षोऽपि। अर्थोपार्जनं जीविका वा कथं कर्तव्यं कथञ्च न कर्तव्यम् इत्येव धर्मः। इन्द्रियसुखाभिलाषरूपः अथवा इन्द्रियसुखरूपः कामः कथं सम्पादनीयः इत्यत्रापि विधिनिषेधरूपः धर्मः भवति।

चतुर्षु पुरुषार्थेषु अर्थः तथा कामः पुरुषस्य विषयभोगाय भवतः। अर्थं विना यथा भोगविषयाः न लभ्यन्ते। तथा चार्थेन संग्रहीकृतविषयाणां भोगः अनुपपन्नः भवति, पुरुषस्य भोगेच्छाऽभावतः। अतः पुरुषस्य विषयभोगे अर्थकामौ अत्यावश्यकौ भवतः।

यथाधर्मम् अर्थकामौ सेवित्वा पुरुषः मोक्षं लभते। मोक्षः भवति पुरुषस्य परमसुखप्राप्तिः। धर्मज्ञानाय आदावेव वेदाध्ययनम् पुरुषैः कर्तव्यम्। तदर्थं ब्रह्मचर्याश्रमः स्वीकर्तव्यः भवति। तदनन्तरं विषयाणाम् उचितभोगाय पुरुषैः गृहस्थाश्रमः स्वीकर्तव्यः भवति। तदनन्तरञ्च ईश्वरप्राप्तये मोक्षाय वा वानप्रस्थसन्यासाश्रमौ क्रमेण स्वीकर्तव्यौ भवतः। तथाहि प्रोक्तं मनुना "सर्वेऽपि क्रमशस्त्वेते यथाशास्त्रं निषेविताः। यथोक्तकारिणं विप्रं नयन्ति परमां गतिम्॥" (६/८८) इति।

१. धर्मः

ध्रियते पुण्यात्मभिः इति धर्मः। मनुस्मृत्यनुसारं अशेषः वेदः धर्मस्य मूलं भवति सर्वधर्माणां तत्र निहितत्वात्। यतः वेदः सर्वज्ञानमयः भवति, अतः वेदविदां स्मृतौ आचारे च धर्माः प्रकाशन्ते। तस्मादेव वेदविदां स्मृतिग्रन्थाः धर्मशास्त्रत्वेन गण्यन्ते। एवं चतुर्विधं धर्मलक्षणम् उक्तं वेदविदा आचार्यमनुना - "वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः" इति (२/१२)। वेदोक्ताः तथा स्मृत्युक्ताः नियमाः, सदाचाराः, आत्मनश्च प्रसन्नता पुण्यात्मभिः सदैव ध्रियन्ते। अत एते चत्वारः साक्षात् धर्माः भवन्ति।

शङ्कराचार्यस्य मतानुसारं द्विविधः धर्मः भवति प्रवृत्तिलक्षणः निवृत्तिलक्षणश्चेति भेदात्। निवृत्तिलक्षणः धर्मः ज्ञानवैराग्यलक्षणः भवति। ब्रह्मज्ञाने जाते सर्वविधासक्तितः निवृत्तिः जायते। एषा निवृत्तिरेव वैराग्यं, इन्द्रियविषयभोगविरागभावः। प्रवृत्तिलक्षणे धर्मे कर्मफलाकाङ्क्षा भोक्तृभोग्यभावश्च भवतः।

केषाञ्चिन्नये प्रवृत्तिलक्षणः धर्मोऽपि मोक्षहेतुः। किन्तु निवृत्तिलक्षणधर्मस्य अथवा ज्ञानवैराग्यलक्षणधर्मस्य मोक्षहेतुत्वम् अधिकं युक्तं भाति। तथाह्युपनिषद्वाक्यं "यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति..." इति (वृ.उ. ४/५/१५)। अर्थात् तत्र प्रवृत्तिनिषेधः उच्यते।

१.१ वेदः

"यागादिरेव धर्म" इति मीमांसकाः मन्यन्ते। यागादीनां वेदोक्तत्वाद् चतुर्षु प्रथमस्य धर्मलक्षणस्य दृष्टान्तता भवति। यागादिना मनुष्यैः स्वर्गादीनि फलानि प्राप्यन्ते। स्वर्गादिसुखलाभाय यागादिः प्रयोजनं भवति मानवानाम्। तथा "चोदनालक्षणोऽर्थो धर्मः" इत्यपि मीमांसकमते धर्मलक्षणम्। अर्थात् प्रेरणालक्षणं प्रयोजनं धर्मः भवति। एतेषां नये सम्पूर्णः वेदः प्रेरणालक्षणः भवति। अतः वेदः धर्ममूलम् इति आयातम्। अभ्युदयलक्षणः अपि धर्मः भवति। यथा पुरुषाणाम् अग्निहोत्रेण मनुष्यलोकात् स्वर्गलोके अभ्युदयः भवति। यथा वा स्वाध्यायाध्ययनेन ज्ञानस्य अभिवृद्धिः जायते यशश्च वर्धते।

१.२ स्मृतिः

वेदविदां स्मृतिः धर्ममूलं भवति। तथाहि प्रोक्तं मनुना "यः कश्चित्कस्यचिद्धर्मो मनुना परिकीर्तितः। स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः।।" इति(२/७)। अर्थात् यतः वेदमूलकता स्मृतेः, अतः धर्ममूलकतापि। तथा चोक्तं "धर्मशास्त्रं तु वै स्मृतिः" इति। वेदोक्ताः धर्माः युगोपयोगिरूपेण स्मृतौ वर्ण्यन्ते। वेदानुसारिणि स्मृतिग्रन्थे धर्माणां विभागः एवं भवति - वर्णधर्माः, आश्रमधर्माः, वर्णाश्रमधर्माः, गौणधर्माः, नैमित्तिकधर्माश्चेति। ब्राह्मणादिवर्णमाश्रित्य ये धर्माः प्रवर्तन्ते ते वर्णधर्माः कथ्यन्ते, यथा यज्ञोपवीतधारणम्, ब्राह्मणस्योपवीतं कार्पासनिर्मितं भवति, शणनिर्मितमुपवीतं क्षत्रियस्य भवति, तथा च वैश्यस्य अविजसूत्रनिर्मितम् उपवीतं भवति। ब्रह्मचर्याद्याश्रममाश्रित्य आश्रमधर्माः प्रवर्तन्ते, यथा भिक्षावृत्तिः। वर्णम् आश्रमञ्चाश्रित्य ये धर्माः प्रवर्तन्ते ते वर्णाश्रमधर्माः भवन्ति, यथा पालाशपैप्पलदण्डधारणम्। गुणमाश्रित्य गुणधर्माः प्रवर्तन्ते, यथा राज्ञः प्रजापालनम्। नैमित्तिकधर्मश्च यथा प्रायश्चित्तम्। ब्रह्मचर्याद्याश्रमिणाम् आश्रमभेदेन भिन्नाः धर्माः भवन्ति। एते विशिष्टाः धर्माः भवन्ति। सामान्यतया दश धर्माः भवन्ति धृतिः, क्षमा, दमः, अस्तेयं, शौचम्, इन्द्रियनिग्रहः, धीः, विद्या, सत्यम्, अक्रोधश्चेति भेदात्। एते सामान्यधर्माः। अन्ये केचन आपत्कालीनाः धर्माः भवन्ति।

१.३ सदाचारः

सताम् आचारः सदाचारः। सदाचारः धर्ममूलं भवति। सज्जनाः यादृशम् आचरणं कुर्वन्ति लोकः तस्य अनुवर्तनं करोति इत्येवं श्रीमद्गीतायामुक्तं भगवता श्रीकृष्णेन। शिष्टाचारः एव सदाचारः भवति। मर्यादापुरुषोत्तमः श्रीरामचन्द्रः स्वात्मानं सज्जनस्य दृष्टान्तरूपेन उपस्थापितवान्। अतः स एव अनुकर्तव्यः।

१.४ प्रसन्नता

आत्मनः प्रसन्नतायां यत् क्रियते तदपि धर्मः। दुःखी सन् धर्मानुष्ठानं कुर्वन्नपि धर्मफलं न लभते। प्रसन्नतामात्रेण तु सुखं जायते। अतः प्रसन्नता धर्ममूलं भवति।

१.५ सम्यक्सङ्कल्पजः कामः

याज्ञवल्क्यमते इदं पञ्चमं धर्मलक्षणम्। उद्देश्यं यदि शुभं भवति तर्हि तत्पूरणाय यः कामः जायते सोऽपि धर्मः।

२. अर्थः

धनं सम्पत्तिः वा अर्थशब्देन व्यपदिश्यते। धनस्य अर्जनं रक्षणं तथा वर्धनम् अपि अर्थः एव। आचार्यः कौटिल्यः वदति "मनुष्याणां वृत्तिरर्थः" इति। यद्यपि वृत्तिः जीविका वा धनसाधिका भवति न तु धनमेव। तथापि धनम् अर्थः इति प्रधानव्यपदेशः। ब्राह्मणानां न तथा जीविका विद्यते यथा क्षत्रियादीनाम्। मूलतः अध्यापनं याजनं भिक्षा तथा दानग्रहणमेव तेषां वृत्तयः। किन्तु मनुस्मृतौ कर्मभेदेन ब्राह्मणानां चत्वारः विभागाः कल्पिताः, तेषाञ्च भिन्नानि कर्माणि प्रोक्तानि। कुसूलधान्यकस्य ब्राह्मणस्य षट् कर्माणि भवन्ति। एवं कुम्भीधान्यकस्य त्रीणि, त्र्यहैहिकस्य द्वे, अश्वस्तनिकस्य च एकं कर्म भवति। क्षत्रियाणां प्रधानवृत्तिः भवति राजनीतिः, वैश्यानां वाणिज्यं तथा शुद्रानां सेवा।

२.१ जीविकाभेदः

जीव्यतेऽनया इति जीविका, जीवनोपायः इत्यर्थः। यस्योपायस्याश्रयनेन सत्यहानिर्न जायते सः ऋतम्(१) इति उच्यते, यथा उञ्छशिलम्। अन्येषां क्षेत्रात् एकैकं कृत्वा पतितधान्यचयनम् उञ्छं तथा धान्यसमूहचयनं शिलम् उच्यते। अयाचितभिक्षा अमृतं(२) तथा याचितभिक्षा मृतम्(३) उच्येते। कर्षणेन बहु प्राणिनां मृत्युः भवति, अतः कर्षणं प्रमृतम्(४) उच्यते। तथा च वाणिज्यं सत्यानृतम्(५) इति उच्यते, यतो हि वाणिज्ये प्रायशः सत्यानृतयोः व्यवहारः भवति। एते जीविकायाः सामान्यभेदाः भवन्ति।

३. कामः

इन्द्रियसुखाभिलाषः कामः। पुरुषार्थचतुष्टयेऽयं तृतीयः पुरुषार्थः। "धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ" इति भगवद्वचनात् धर्माविरुद्धः कामः श्रेष्ठः भवति। न केवलः कामः, अर्थोऽपि धर्माविरुद्धोपायेनार्जितः रक्षितः वर्द्धितश्च सन् श्रेष्ठतां भजते। तथैवोक्तं "परित्यजेदर्थकामौ यौ स्यातां धर्मवर्जितौ" इति (मनु.४/१७६)। यथा चौर्यकार्यं धर्मवर्जितं भवति। तथा च दानं धर्मः भवति, किन्तु स्त्रिपुत्रपौत्रादियुक्तस्य सर्वस्वदानं न धर्मः। अतः धर्माविरुद्धता रक्षणीया। तथाहि प्रोक्तं मनुना "अतिप्रसक्तिं चैतेषां मनसा संनिवर्तयेद्" इति। अर्थात् पुरुषः विषयभोगे इन्द्रियाणाम् अतिप्रसक्तिं मनसा निवर्तयेत्। अतः आसक्तिरहितः धर्मोचितश्च विषयभोगः कर्तव्यः।

४. मोक्षः

मोक्षः नाम मुक्तिः विश्लेषो वा। जननमरणयोः विश्लेषः मोक्षः। कथं मोक्षः पुरुषार्थः भवति इति चेद्वक्तव्यं दुःखनिवर्तकत्वादिति। दुःखनिवृत्तिः सर्वेषाम् इष्टा भवति। सा तु मोक्षादेव जायते, अतः मोक्षः पुरुषार्थः। अयं

विषयः साङ्ख्यकारिकायां तद्भाष्ये च सम्यक् प्रतिपादितः। दुःखं त्रिविधं भवति आधिभौतिक-आधिदैविक-आध्यात्मिकभेदात्। अत्र प्रश्नः स्यात्, धर्मेण अर्थेन कामेन च सुखलाभः तथा दुःखनिवृत्तिः जायेते, तर्हि मोक्षरूपपुरुषार्थस्य किं प्रयोजनमिति। किन्तु आत्यन्तिकदुःखनिवृत्तिः मोक्षादेव न धर्मादितः। "तद्यथेह कर्मचितो लोकः क्षीयते, एवमेवामुत्र पुण्यचितो लोकः क्षीयते"(छा.उ. ८/१/६) इति वेदवचनात् धर्मचितसुखस्य अनित्यता ज्ञायते। अतः पृथक्तया मोक्षरूपः पुरुषार्थः स्वीकर्तव्यः। न्यायाचार्यः तथा वेदान्ताचार्यः धर्मराजाध्वरीन्द्रः वदति मोक्षः परमपुरुषार्थः इति। तथाहि प्रोक्तं वेदान्तपरिभाषायाम् "इह खलु धर्मार्थकाममोक्षाख्येषु चतुर्विधपुरुषार्थेषु मोक्ष एव परमपुरुषार्थः । न स पुनरावर्तते इत्यादिश्रुत्या तस्यैव नित्यत्वावगमात्।" इति। प्रत्यक्षेणैव ज्ञायते यत् अर्थजन्यं तथा कामजन्यं सुखम् अनित्यमिति। धर्मजन्यं सुखमपि अनित्यमिति पूर्वोक्तश्रुत्या ज्ञायते।

मनुस्मृतौ प्रोक्तं "स सर्वसमतामेत्य ब्रह्माभ्येति परं पदम्" इति। अर्थात् स्पष्टं यत् मोक्षरूपं परं पदं भवति ब्रह्म। यः समाहितः सर्वम् आत्मनि पश्यन् अधर्मात् निवर्तते सः ब्रह्माभ्येति।

ज्ञानादेव मुक्तिः इति वेदान्तमतम्। अर्थात् आत्मज्ञानमेव मोक्षः। आत्मविषयकं समीचीनं ज्ञानम् अस्माकं नास्ति, अतः अज्ञानम् अस्ति। अज्ञाननाशे ज्ञानमात्रं मोक्षः उपपद्यते। तथाहि श्रुतिः "तत्त्वमसि" इति, अर्थात् परमात्मा एव जीवात्मा। लौकिकाः स्थूलदृष्टयः सूक्ष्मम् आत्मतत्त्वं न जानन्ति, अतः विप्रतिपत्तयः जायन्ते। "श्रवणायापि बहुभिर्यो न लभ्यः" इत्यादिश्रुतिवचनाच्च आत्मज्ञानरूपः मोक्षः दुर्विज्ञेयः इति उपपद्यते।

मोक्षविचारे अद्वैतमतं बहुजनसम्मतं भवति, यतो हि भारतीयपरम्परायाः आधाररूपवेदस्य समन्वयः अद्वैतवेदान्ते सर्वोत्तमतया परिलक्षितः भवति।

५. उपसंहृतिः

चतुर्षु धर्मार्थकामानां विधयः सर्वैः समानतया पालनीयाः आसन्। अतः प्रायशः एकरूपाः नियमाः आसन्। किन्तु मोक्षस्वरूपः मोक्षोपायः इत्यादयः आध्यात्मिकविषयाः नियमबद्धाः नासन् तथा समानरूपाः अपि नासन्। अतः बिभिन्नसमये नवीनमतानि निरपेक्षतया प्रतिष्ठितानि आसन्। तेषु यानि वैदिकानि तानि प्रायशः ईश्वरसहितानि। वैदिकानां मतानां मोक्षविचारः ईश्वरकेन्द्रिकः भवति, यथा योगशास्त्रे ईश्वरप्रणिधानमिति उच्यते, पूर्वमीमांसायाम् उच्यते ईश्वरार्पणबुद्ध्या क्रियमाणः धर्मः मोक्षहेतुः भवति, वेदान्ते ब्रह्मभावः अर्थात् ईश्वरभावः मोक्षः उच्यते। एवं नास्तिकदर्शनेषु चार्वाकाः वदन्ति मृत्युरेव मोक्षः जननमरणयोः विश्लेषकारणादिति, यद्यपि मोक्षस्य माहात्म्यं तेषु नास्ति। ते जन्मान्तरं तथा मृत्योः परं किमपि नाङ्गीकुर्वन्ति। एतेषां नये कामः एव मुरुषार्थः। अतः "ऋणं कृत्वा घृतं पिबेदि"त्यादिकमुपपद्यते, यतोहि अधर्माचरणे जन्मान्तरीयं फलभोगभयं नास्ति। यदि कश्चिद् ऋणं दद्यात् तर्हि अर्थोपार्जनस्यापि आवश्यकता नास्ति इत्येवमेव ते प्रतिपादयन्ति। किन्तु मूलधारायां चत्वारः पुरुषार्थाः भवन्ति ।

यद्यपि धर्मार्थकामानामपि प्रयोजनं विद्यते तथापि मोक्षस्य प्रयोजनं परमं भवति। मोक्षप्राप्त्यनन्तरम् अन्येषां पुरुषार्थानां पुनः प्रयोजनं न भवति। अर्थात् एकलाभेन सर्वलाभः। अतः चतुर्षु मोक्षः परमपुरुषार्थः भवति ।

कथा

# पीतः पक्षी

## शुभेन्दु-घोषः

तदा अपराह्णम्, घटिकायां प्रायः पञ्चवादनम्। आगन्तुकागमनसंकेतसूचकघण्टानादं श्रुत्वैव शीघ्रं द्वारं प्रति अगमत् नलिनीदेवी। अलिन्दत एव स्वरध्वनिं सप्तममारोहय्य कथितवती – 'नन्दे! ह्य एव त्वामवदं द्विनद्वयं यावत् किञ्चित् शीघ्रम् आगन्तव्यम्। बहूनि कार्याआआ..' अर्धपथमतिक्रम्य एव तद्वचः 'न ययौ न तस्थौ' इव अतिष्ठत्। द्वारमुन्मोचन्ती एवापश्यत् यत् सस्मितं दण्डायमाना अस्ति चतुर्दशवर्षीयसी नन्दायाः तनुजा प्रिया।
'अरे! त्वं? तव माता क्व?' – किञ्चित् पेलवमेव नलिनीदेवी अपृच्छत्।
- 'मातुः ज्वरोऽभवत् आण्टि! अतो मां प्रेषितवती।'
- 'त्वां प्रेषितवती' आननपूर्णम् असन्तोषं सहकृत्य सा उक्तवती – 'पूर्वं द्विरेव मम काचपात्रं भग्नं जातम्। अद्यापि चेद् अनवधानतया तथा किमपि भवति, मातुर्मासिकवेतनतः तदहम् वियोजयिष्यामि'।
-'तथा न भविष्यति इतः प्रभृति आण्टि! द्रक्ष्यसि। यथैतादृशानि कार्याणि क्रियन्ते, तथा मात्रा शिक्षिताहम्'- कम्पमानेन गुञ्जनेन कथञ्चित् मातः प्राप्तानि वचांसि सा गृहकर्त्रीकर्णकुहरं सम्प्रेष्य स्थाणुरिवातिष्ठत्।
-'अस्तु आगच्छ। निवासकक्षं सम्यक्तया परिष्कृत्य वासनानि सम्मार्ज्य यथास्थितं सुन्दरं स्थापय। शयनकक्षाय त्वं नालम्, तन्मया एव करणीयं रे! नन्दाया अपि अहो साधारणी धीः। अद्य एव तया ज्वर आमन्त्रणीय आसीत्।'
निर्दिष्टं कार्यं सम्पाद्य गृहगमनाय अनुमतिं प्रार्थयितुं समागतायां प्रियायां नलिनीदेवी तामवोचत् – 'नन्दया उक्तं वा श्वः दशवादनाभ्यन्तरे एव अस्मत्सभोद्याने तव आगमनाय। ताम् अहम् पूर्वमेव ज्ञापितवती। श्वः अपि पूर्ववत् पुस्तकानि खातिकानि च प्रदास्यामि। किमु उक्तम्?'
-'आम्। माता उक्तवती'- किञ्चिदुच्छलिता एव सा अवदत्।
-'अस्तु। इदानीं तर्हि गच्छ। श्वः उत्तमं किमपि परिधाय आगमिष्यसि भोः!'

अद्य प्रभातकालः भृशं मधुरः, अन्येषां न जाने, प्रियायाः समीपे तु अवश्यमेव। अद्य नभेम्बरमासस्य चतुर्दशदिनाङ्कः खलु। अद्य तु शिशुदिवसः, नाम तेषां दिवसः, पुस्तकादिप्राप्तिदिवसः। पूर्वस्मिन् वर्षेऽपि नलिनी आण्टी तस्यै विद्यालयीयपुस्तकादीनि दत्तवती। तत्रैव पुरो दृश्यमाने उद्याने अनुष्ठानं भवति। बहबः शिशवः समागच्छन्ति। बहबो मान्याः समलंकुर्वन्ति मञ्चम्। उत्तमं भाषते नलिनी आण्टी। प्रियाया भृशं हर्षो भवति तदा।

मातरमनुरुध्य सा शारदीयामुपलक्ष्य क्रीतं पीतं शाटकं(frock) परिहितवती। एतस्मिन् शाटके सा भृशं प्रीणाति, प्रथमं सा स्वयं विचित्य क्रीतवती खलु। दशवादने यदा सा उद्यानं समागच्छत्, तदा बहब एव आगतवन्तः। पुरत आसनसरणिः प्रायः पूर्णा एव। प्रवेशफटकोपरि एका पट्टिका(banner) पूर्वत एव स्थापितास्ति। तत्र लिखितमस्ति –

## “নতুন সকাল (হলুদ পাখিরা মেলুক ডানা)”

[ नवप्रभातम् (पीताः पक्षिणो विकसन्तु पतत्राणि)]

कथमद्भुतमेव प्रतिभाति प्रियायै लेखमेतत्। यदि प्रभातमेव भवेत्, तर्हि कथमधुना एतावत्यां वेलायामिदमनुष्ठानं सम्पाद्यते। कुत्र वा पीता विहगाः? अत्र तु अङ्गुलिगण्या एव केचित् वायसाः शालिकाः द्वित्राः इतस्ततः उड्डयनरताः सन्ति। अपि च, किं पीताः विहगाः उड्डयनकौशलं न जानन्ति यत् तेभ्यः साहाय्यं विधीयते पतत्रं विकसितुम्। विहगाः स्वयमेव उड्डयन्ति। तद्गृहपार्श्वस्थे एव वृक्षे प्रत्यहं प्रभाते कतिचित् पीताः विहगाः समागच्छन्ति, ते स्वयमेव आगच्छन्ति, स्वयमेव च उड्डयन्ति। पूर्वस्मिन् वर्षेऽपि एतल्लेखमेवासीत्। तदापि न कोऽपि पीतो विहगः तया दृष्टः। उद्यानं प्रविश्य इतस्ततः दृष्टिविक्षेपं विधाय न कमपि पीतं विहगं दृष्टवती। परन्तु क्व ते? सर्वत्रैव परिचिता एव पक्षिणः।

आसनमुपविश्य अस्थिरा इव अभवत् प्रिया। अधिमञ्चं किं वा भाषते नलिनी आण्टी, तिलपरिमितमपि तस्या बुद्धिगोचरं न भवति। आण्टी वदति- शिशुश्रमः न साधनीयः, शिशवो निष्कलङ्काः, पूताः। तेषां विकासाय अस्माभिः भवद्भिरेव यतनीयम्।– कोऽयं शिशुश्रमः? तत्र तस्यां पल्ल्याम् इदानीं खननकार्यं प्रचलति, तत्र श्रमः संसाध्यते जनैः। ते श्रमिकाः, श्रमं कुर्वन्ति। श्रमः किमनायाससाध्यः, शिशवः किं श्रमाय अलम्? रवीन्द्रनाथस्य “ওরা কাজ করে” कवितायां सा पठितवती यत् श्रमः कीदृक् आयाससाध्यः। शिशवः किं तत्र समर्थाः? तस्या भृशं हास्यमायाति। तत्पद्यं मन्ये आण्ट्या न पठितम्। परन्तु पठनाय पुस्तकप्रदानं सत्यमेव। परन्तु कदा तद् भविष्यति, न ज्ञायते। इतश्च मातुः शरीरमपि सम्यग् नास्ति। ज्वरस्य उत्थानपतनक्रिया अधुनापि प्रचलति। इतश्च नलिनी आण्टी अपि स्वीयवचनं समाप्य सभापतिपदमलंकुर्वाणाय विधायकमहोदयाय अन्वरुणत् किञ्चिद् वक्तुम्। विधायकोऽपि अतिसंक्षेपेण नलिनीदेवीनामेतत्समवेतोद्योगं भूयो भूयः प्रशंसन् साधुवादैः समभ्यर्थितवान्। ततः समागतं तद्बहुप्रतीक्षितं मूहुर्तं, पुस्तकप्राप्तिमूहुर्तम्। प्रियामुखं पुनः पद्मवत्प्रकाशितम् अभवत्।

अनुष्ठानान्ते च नलिनीदेवी मञ्चाद् अवरुह्य अतिथिभिः साकं जल्पने रताभवत्। प्रियामवलोक्य तत्समीपं समागत्य अवदत् – ‘सर्वं प्राप्तं वा? सुशोभना प्रतीयसे अद्य बहु। माता ते कथमस्ति?’

- ‘आम्, सर्वं प्राप्तम्। परन्तु मातुः ज्वर इदानीमपि अस्ति आण्टि।’

- ‘अपराह्णे किं सा आगमिष्यति?’

-‘न जाने।’

-‘अस्तु, शृणु तावत्। माता चेद् आगन्तुं न शक्नुयात्, तर्हि त्वमेव प्रायः पञ्चवादने आगमिष्यसि। केचिद् अतिथय आगमिष्यन्ति अद्य मध्याह्ने। ते मम गृहे एव खादिष्यन्ति। त्वं तर्हि आगमिष्यसि। पञ्चवादनात् पूर्वं मा आगच्छ। नूतनानि पुस्तकानि प्रदत्तानि, गृहे उत्तमतया पठनीयम्, बुद्धम्!’

- ‘अस्तु आण्टि’- सस्मितम् अवदत् प्रिया।

ततः सोत्साहं प्रस्थानद्वारं प्रति धावितवती सा।

प्रबन्धः

# नवीनशिक्षानीतिः

## तुहिनमण्डलः

मानवजीवनस्य परिवर्तनं हि प्रपञ्चस्य मूलम्। मनुष्याः अपि जीर्णानि वासांसि परित्यज्य नवानि धारयन्ति। उन्नत्यै परिवर्तनम् अवश्यं करणीयम्। एवमेव अस्माकं भारतवर्षे शिक्षाक्षेत्रे उन्नतिविधानाय शिक्षानीतेः परिवर्तनं विहितम्। स्वतन्त्रताप्राप्तेः परम् अष्टषष्ट्युत्तरोनविंशतितमे ईशवीयाब्दे (१९६८) प्रथमवारं भारतवर्षस्य शिक्षानीतेः परिवर्तनं जातम्। ततः परं षडशीत्यधिकोनविंशतितमे ईशवीयाब्दे (१९८६) पुनः शिक्षानीतिः परिवर्तिता। ततः चतुस्त्रिंशद्वर्षेभ्यः परम् अस्मिन् विंशत्यधिकविंशतितमे ईशवीयाब्दे (२०२०) शिक्षानीतिः पुनः परिवर्तिता। परन्तु अस्याः नीतेः प्रचलनाय इतोऽपि प्रायः वर्षद्वयम् अपेक्षते।

बहु विचारं कृत्वा इयं नीतिः निर्मिता। भारतवर्षस्य सर्वस्तरीयमनुष्येभ्यः परामर्शादिकं स्वीकृत्य इयं नीतिः निर्धारिता। नीतिनिर्धारणपरिषदः अध्यक्षः आसीत् कस्तुरी-रञ्जन-महोदयः। नीतिनिर्धारणसमये एकः विचारः आगतः यत् प्राथमिककक्षायां शिशवः विद्यालयं गन्तुं कथं न इच्छन्ति? कथं वा छात्राः विद्यालयात् पलायन्ते? तदा इदम् उत्तरं प्राप्तं यत् षड्वर्षीयशिशोः पठनापेक्षया क्रीडायामेव अधिका रुचिः तिष्ठति। किञ्च सा क्रीडा शिशवः गृहे एव प्राप्नुवन्ति, न तु विद्यालये। तस्मादेव विद्यालयगमने तेषां वितृष्णा भवति। अतः नीतिनिर्धारणपरिषदा चिन्तितं यत् शिशूनां कृते विद्यालये एव क्रीडायाः व्यवस्था करणीया, किञ्च परीक्षायाः भारः अपि किञ्चित् न्यूनः करणीयः येन गृहापेक्षया विद्यालये एव ते अधिकसमयं स्थातुम् इच्छेयुः। तस्मात् नवीनशिक्षानीतौ दश + द्वे (१०+२) इति नियमं परिवर्त्य पञ्च + त्रीणि + त्रीणि + चत्वारि (५+३+३+४) इति नियमः कृतः। नवीनशिक्षानीत्यनुसारं शिशूनां वयः यदा वर्षत्रयं भविष्यति ततः प्रभृत्येव तैः विद्यालयः गमनीयः। शिशवः गृहे यत् कार्यं कुर्वन्ति तदेव कार्यं ते विद्यालये कुर्युः। तस्मिन् समये शिशूनां कृते पठनस्य किञ्चिदपि भारः न स्थास्यति। विद्यालयं गत्वा स्वच्छन्दसा यदिच्छन्ति तदेव कर्तुं शक्नुवन्ति शिशवः। विद्यालये एव तेषां कृते क्रीडायाः सर्वाः व्यवस्थाः स्युः। एतेन शिशूनां विद्यालयगमने रुचिः वर्धेत। एवं वर्षत्रयं क्रीडया यापनात् परं शिशूनां वयः यदा षड्वर्षमितं भविष्यति तदा तेषां प्रथमकक्षा आरभ्यते। ततः द्वितीयकक्षा। परन्तु मध्ये कापि परीक्षा न स्यात्। एवञ्च साकल्येन पञ्च वर्षाणि विद्यालये व्यतीतानि भविष्यन्ति शिशूनाम्। इदं वर्षपञ्चकं भवति foundational stage अर्थात् प्राथमिकस्तरः। ततः परं वर्षत्रयात्मकस्य द्वितीयस्तरः। इदम् उच्यते preparatory stage अर्थात् प्रस्तुतिस्तरः। अस्मिन् स्तरे तृतीयकक्षातः पञ्चमकक्षापर्यन्तं पठनं भविष्यति। इतः प्रतिवर्षं च परीक्षाः अपि भविष्यन्ति। अत्र मातृभाषया एव पाठदानं भविष्यति। ततः परं

वर्षत्रयं व्याप्य तृतीयस्तरः। इदम् उच्यते middle stage अर्थात् मध्यमः स्तरः। षष्ठकक्षातः अष्टमकक्षापर्यन्तं पठनं सम्पूर्णं भविष्यति अस्मिन् स्तरे। अत्र विशेषः अस्ति यत् छात्राणां कृते विषयाध्ययनेन सह कार्यसम्बन्धिपाठनमपि (vocational course) भविष्यति। तेन सह संस्कृतादिभारतीयभाषासु काचन एका भाषा पठनीया। ततः परं वर्षचतुष्टयात्मकः चतुर्थस्तरः। इदम् secondary stage उच्यते। नवमकक्षातः द्वादशकक्षापर्यन्तं पठनं सम्पूर्णं भविष्यति अस्मिन् स्तरे। अत्रायं विशेषः यत् इदं सत्रात्मकं भविष्यति। वर्षचतुष्टये अष्टौ सत्राणि भविष्यन्ति। प्रतिसत्रं षण्मासात्मकः कालः दास्यते। साधारणतः दृश्यते यत् छात्राः परीक्षायाः पूर्वमेव परीक्षायाः कृते पठनम् आरभन्ते। तस्मात् प्रतिसत्रं परीक्षाः भवन्ति चेत् पठनं प्रति छात्राणाम् आग्रहः वर्धेत। किञ्च इदानीन्तने काले एकादशकक्षायां विज्ञानविभागः कलाविभागः इत्यादयः ये भेदाः सन्ति ते भेदाः अस्यां शिक्षानीतौ न स्थास्यन्ति। नवीनशिक्षानीत्यनुसारं यः कोऽपि विषयः चेतुं शक्यते। यथा यदि कश्चित् जीवनविज्ञानं, संस्कृतं, वाणिज्यं, सङ्गीतम् इति युगपत् अध्येतुं इच्छति चेत् तत्कर्तुं शक्यते। समगोत्रीयाः एव विषयाः चेतव्याः इति नियमः न स्थास्यति। तेन सह काचित् एका वैदेशिकभाषा अपि शिक्षणीया भविष्यति। एवञ्च द्वादशकक्षा समाप्यते। पुरातननीत्यनुसारं यस्मिन् वयसि छात्राणां द्वादशकक्षा समाप्यते नवीननीत्यनुसारमपि तदैव द्वादशकक्षा समाप्यते। परन्तु कालावधौ भेदः दृश्यते। नवीनशिक्षानीत्यनुसारं पञ्चदश वर्षाणि विद्यालयीयशिक्षा भविष्यति। यतो हि वर्षत्रयात् प्रागेव विद्यालयगमनम् आरप्स्यते।

इतः परं समयः आगच्छति महाविद्यालयगमनाय। महाविद्यालयस्य या शास्त्रिकक्षा (Graduation) सा इदानीं नवीनशिक्षानीत्यनुसारं वर्षचतुष्टयात्मकं जातम्। तत्र च प्रतिवर्षं परीक्षायाः परं पृथक्-पृथक्-नाम्ना प्रमाणपत्रं दास्यते। प्रथमवर्षात् परं यत् प्रमाणपत्रं दास्यते तत्र “Graduation Certificate” इति लिखितं स्यात्। द्वितीयवर्षात् परं यत् प्रमाणपत्रं दास्यते तत्र “Graduation Diploma” इति लिखितं स्यात्। तृतीयवर्षात् परं यत् प्रमाणपत्रं दास्यते तत्र “Graduation Degree” इति लिखितं स्यात्। सामान्यतः अस्मिन् वर्षत्रये एव शास्त्रिकक्षा समाप्यते। ततः परं छात्राः इच्छन्ति चेत् वृत्रिलाभाय आवेदयितुं शक्नुवन्ति। परं च आचार्यकक्षायां प्रविष्टुमपि शक्नुवन्ति। ये केचन स्वपठनं अग्रे चालयितुम् इच्छन्ति ते चतुर्थवर्षे प्रवेशं स्वीकुर्युः। शास्त्रिकक्षायाः चतुर्थवर्षे गवेषणाविषये पठनं भविष्यति। तत्र च प्रमाणपत्रे “Graduation Research” इति लिखितं स्यात्। अत्र शास्त्रिकक्षायां प्रतिवर्षं प्राप्तानां प्रमाणपत्राणां मूल्यं स्थास्यति। किञ्च तदाश्रित्य चतुर्षु वर्षेषु मध्ये यदि कश्चित् पठनं त्यजति तर्हि ततः परं यदा सः पुनः पठितुम् इच्छति तर्हि यत्र तेन त्यक्तं ततः एव तस्य पठनम् आरप्स्यते। इयमतीव सम्यक् एका व्यवस्था। पुरातनव्यवस्थायां तु शास्त्रिकक्षायां मध्ये पठनं त्यक्त्वा पुनः पठितुम् इच्छति चेत् आदितः अर्थात् प्रथमवर्षे पुनः प्रवेशः स्वीकरणीयः, परन्तु नवीननीत्यनुसारं यत्र त्यक्तं ततः एव पुनः प्रवेशः स्यात्।

ततः परं विश्वविद्यालये आचार्यकक्षायां (Post-graduation) द्विप्रकारिका व्यवस्था विहिता। एका भवति एकवर्षात्मिका, अपरा भवति द्विवर्षात्मिका। येन शास्त्रिकक्षायां वर्षचतुष्टयं पठितं तेन आचार्यकक्षायाम् एकवर्षं पठनीयम्। येन च शाश्त्रिकक्षायां वर्षत्रयम् अधीतं तेन आचार्यकक्षायां वर्षद्वयं पठनीयम्। ततः साक्षात् शोधकार्ये (Ph.D.) प्रवेशः स्यात्। नवीनशिक्षानीत्यनुसारं विशिष्टाचार्यः (M.Phil.) त्यक्तः। शोधकार्यं तु चतुर्वर्षात्मकं भविष्यति। अत्र किमपि विशेषपरिवर्तनं न जातम्।

एतद्विहाय नवीनशिक्षानीतौ इतोऽपि केचन विषयाः सन्ति ये खलु भारतवर्षस्य सार्विकोन्नत्यै सहायकाः भविष्यन्ति। यथा इतः परं वैदेशिकविश्वविद्यालयाः अपि भारतवर्षे तेषां परिसरान् उद्घाटयितुं शक्नुवन्ति। तेन पठनस्य मानं वर्धेत। नवीनशिक्षानीत्यनुसारं समग्रदेशस्य शिक्षाव्यवस्थापरिचालनाय पृथक्-पृथक्-सर्वकारीयविभागाः भविष्यन्ति। वैयक्तिक-विद्यालयादिषु शुल्कमपि सर्वकारेण निर्दिष्टं स्यात्। ततः अधिकं छात्रैः न दानीयं भविष्यति। किञ्च छात्राणाम् अङ्कदानविषयेऽपि कानिचन परिवर्तनानि आगतानि। स्वलिखितोत्तर-पत्रमाश्रित्य अङ्कदानं यथा भविष्यति तथैव नवीननीत्यनुसारं स्वेनापि आत्मनः अङ्कदानं करणीयम्। तेन सह वर्गे छात्राणाम् आचरणं कथं तिष्ठति तदाश्रित्यापि शिक्षकाः अङ्कदानं कुर्युः। किञ्च मित्राण्यपि व्यवहारमाश्रित्य अङ्कदानं करिष्यन्ति। एतेन मित्रैः सह, शिक्षकैः सह च सौहार्द्यं सम्मानं च वर्धेत।

परन्तु नवीनशिक्षानीतौ केचन विषयाः सन्ति ये खलु हानिकारकाः। यथा नवीनशिक्षानीतौ मातृभाषया पाठदाने प्रयासः विहितः। यद्यपि एतत् करणीयमेव इति नास्ति, तथापि अनेन आङ्गलभाषाशिक्षा किञ्चित् न्यूना स्यात्। तेन परस्मिन् काले वृत्तिकरणसमये क्लेशः स्यात्। किञ्च नवीनशिक्षानीतौ उक्तं यत् विद्यालयादिषु कथं पाठः भवेत्, कथं शिक्षकनियोगः भवेत्, केषां विषयाणां पाठः भवेत् इत्यादि सर्वं केन्द्रीयसर्वकारः निर्धारयिष्यति। तच्च राज्यसर्वकारेण स्वीकरणीयमेव इति। परन्तु एतत् भारतवर्षस्य युक्तराष्ट्रियशासनव्यवस्थायाः विरुद्धं भवति। यतो हि संविधानवचनानुसारं शिक्षाविषये अधिकारः केन्द्रसर्वकारस्य राज्यसर्वकारस्य इत्युभयस्यापि अस्ति।

यद्वा भवतु, नवीनशिक्षानीतौ यानि परिवर्तनानि आगमिष्यन्ति तैः परिवर्तनैः शिक्षाक्षेत्रे उन्नतिः भविष्यति इति तु निश्चप्रचमेव। परन्तु एतैः सह इतोऽपि कानिचन परिवर्तनानि कर्तुं शक्यन्ते स्म। यथा कस्यचित् आदर्शशिक्षकस्य परिचयः कथं स्यात् इति छात्राः शिक्षणीयाः। किञ्च तदाश्रित्य छात्राः अपि शिक्षकाणाम् अङ्कदानं कुर्युः। तेन शिक्षकाणामपि वृत्तिगमनस्य भीतिः स्यात्। तदा पाठदानं विहाय अन्येषु कार्येषु शिक्षकाणां मतिः न स्यात्। एतेन भारतवर्षस्य शिक्षाक्षेत्रं बहु समीचीनं स्यात्। शिक्षाक्षेत्रे उन्नतिः भवति चेत् इतरक्षेत्रेष्वपि भूतिर्ध्रुवा। तेन च अस्माकं भारतवर्षं जगत्सभायां पुनः श्रेष्ठम् आसनं लप्स्यते इति आशास्महे वयम् इति शम् ।

लघुबन्धः

# विदुरनये पण्डितलक्षणम्

## शिवनाथ-सर्दारः

अज्ञातवासानन्तरं प्रत्यागत्य युधिष्ठिरः दुर्योधनस्य समीपे स्वीयराज्यं प्रार्थितवान्। परन्तु खलमतिना दुर्योधनेन युद्धं विना राज्यप्रत्यर्पणे अनिच्छा प्रकाशिता। अतः उद्योगपर्वणि यदा कौरवाः पाण्डवाश्च युद्ध-कामाः तिष्ठन्ति तदा धृतराष्ट्रः सदुपदेशग्रहणाय विदुरम् आहूतवान्। तत्र आलोचनाप्रसङ्गेन महामतिना विदुरेण पण्डितलक्षणप्रसङ्ग उत्थापितः। विदुरनये प्रशस्तानिन्दितकर्मनिष्पादकत्वं तथा शास्त्रार्थेषु श्रद्धा-शीलत्वं पण्डितलक्षणम्। क्रोधो हर्षश्च दर्पश्च लज्जा दम्भः अहंकारश्च यं कर्तव्यभ्रष्टं न कुर्वन्ति स एव पण्डितः। उच्यते महाभारते-

क्रोधो हर्षश्च दर्पश्च ह्रीः स्तम्भो मान्यमानिता।
यमर्थान्नापकर्षन्ति स वै पण्डित उच्यते।। इति।

शैत्यमौष्ण्यं भयमासक्तिः सम्पद् विपद् चेति यस्य कर्तव्यपरिपालने विघ्नं न जनयन्ति स एव पण्डितः। पण्डिताः स्वशक्त्यनुकूलं कार्यं कर्तुम् इच्छन्ति प्रयतन्ते वा। अवज्ञया ते न किमपि वस्तु परित्यजन्ति। तदुक्तं महाभारते-

यथाशक्ति चिकीर्षन्ति यथाशक्ति च कुर्वते।
न किञ्चिदवमन्यन्ते नराः पण्डितबुद्धयः।। इति।

पण्डिताः कामरहिताः सन्तः अर्थमेव श्रेष्ठतया वृण्वते। तेषां संसारिणी प्रज्ञा धर्मार्थानुसारिणी भवति। पण्डिताः क्षिप्रं विजानन्ति विषयान्। दीर्घं यावत् शृण्वन्ति तथा सम्यक्तया अर्थं विज्ञाय ततः परं कार्यारम्भं कुर्वन्ति। न हि जिज्ञासां विना ते परार्थे वाक्यप्रयोगं कुर्वन्ति। उक्तञ्च विदुरेण-

क्षिप्रं विजानाति चिरं शृणोति
विज्ञाय चार्थं भजते न कामात्।
नासम्पृष्टो व्यपयुङ्क्ते परार्थे
तत् प्रज्ञानं प्रथमं पण्डितस्य।। इति।

ये खलु नराः अप्राप्यानि वस्तूनि नाभिवाञ्छन्ति, स्वीयवस्तूनां नष्टत्वेऽपि ये न शोकमग्नाः ते एव पण्डिताः। विदुरनये ते एव पण्डिताः ये समुपजातायां विपदि अपि धीरतां न त्यज्यन्ति। पण्डिताः सत्कार्येषु एव प्रवृत्ता भवन्ति। हितकारिणं प्रति प्रशंसाज्ञापनेऽपि ते कदापि कार्पण्यं न दर्शयन्ति। सम्प्राप्तेऽपि सम्माने ये आनन्दोद्भासिता न भवन्ति, स्वीकृते अपमाने अपि सन्तप्ता न भवन्ति अपि च उभयावस्थायां ह्रद इव निर्विकारास्तिष्ठन्ति ते पण्डितरूपेण गण्यन्ते। उक्तञ्च महाभारते-

न हृष्यत्यात्मसम्माने नावमानेन तृप्यते।
गाङ्गो ह्रद इवाक्षोभ्यो यः स पण्डित उच्यते।। इति।

कुवेरसदृशः धनवान् विद्यायां च गणपतिसदृशः तथा इन्द्रसदृशः प्रभुत्ववान् सन्नपि पण्डितः न कदापि औद्धत्यं प्रकाशयति। तथाह्युक्तं विदुरेण-

अर्थं महान्तमासाद्य विद्यामैश्वर्य्यमेव च ।
विचरत्यसमुन्नद्धो यः स पण्डित उच्यते।। इति शम्।

*ग्रन्थपर्यालोचनम्*

# मोहमुद्गरस्तोत्रसरलार्थः

## शुभङ्कर-दासः

**उपक्रमणिका**

आत्मज्ञानलाभेन एव मुक्तिः भवति। तच्च आत्मज्ञानं तदैव भवति यदा शिष्यस्य स्वस्मिन् गुरौ विश्वासः भविष्यति, किञ्च जगद् अनित्यमिति ज्ञानं भविष्यति। तस्माद् भगवन्तः श्रीशङ्कराचार्याः स्तोत्रमिदं रचितवन्तः सर्वेषां भगवति यथा बुद्धिः भवेत्, यथा च संसारे विरागात् मोक्षस्य प्राप्तिः स्यात् तथा साधयितुम्। भज गोविन्दं भज गोविन्दमित्यादिध्रुवपदाधारेण छन्दोबद्धवाचा रचितेयं श्लोकमाला मोहमुद्गराख्या।

अनाद्यानन्ताविद्याख्येयं मायैव मोहत्वेन अभिमन्यते न केवलं प्रस्तुताचार्यैः, अन्यैः दर्शनान्तरविद्भिरपि। श्लोकश्च सारल्येन बोधं गमयतीति धिया आचार्यैः प्रायशः स्तोत्रं रच्यते जगतः कल्याणाय, सकलजनमनसि आत्मतत्त्वसारोज्जीवनाय च। प्रस्तुतेऽस्मिन् मोहमुद्गरस्तोत्रस्थानां विशिष्टश्लोकानां पदगतसरलार्थः शास्त्रीयगम्भीरार्थदृष्ट्या तात्पर्यार्थश्च प्रतिपादिताः।

**श्लोकः - १**

मूढ जहीहि धनागमतृष्णां कुरु सद्बुद्धिं मनसि वितृष्णाम्।
यल्लभसे निजकर्मोपात्तं वित्तं तेन विनोदय चित्तम्।।

**सरलार्थः**

हे मूढ अविवेकिन्, धनागमतृष्णां धनस्य अर्थस्य आगमनरूपां तृष्णाम् आकाङ्क्षां, जहीहि परित्यज, सद्बुद्धिं सच्चिन्तनं कुरु, मनसि स्वात्मनि वितृष्णां विषयेभ्यः वैराग्यं कुरु सम्पादय। यत् यथावत् निजकर्मोपात्तं सत्कर्मभिः उपार्जितं वित्तं धनं लभसे प्राप्नोषि, तेन तावता एव, चित्तं मनः विनोदय आनन्दय।

**तात्पर्यार्थः**

अत्र भगवन्तः शङ्कराचार्याः वदन्ति यत् धनं कामः च न हि उपभोगेन समाप्तिं गच्छति, परन्तु उत्तरोत्तरं वर्धते एव। तस्मात् धनागमस्य तृष्णा परित्याज्या। यतो हि धनस्य तृष्णा विषयेभ्यः मनः परमात्मनि स्थापयितुम् अवकाशं न ददाति। सच्चिन्तनेन मनसः मालिन्यं क्षीयते। तस्मात् सद्बुद्धिः करणीया। किञ्च मनसि वितृष्णा विषयेषु वैराग्यं सम्पादनीयम्। यतो हि वैराग्यं विना विषयमोहात् मुक्तिः नास्त्येव। अपि च स्वयं सत्कर्मणा यत् प्राप्नोति तेनैव धनेन यावत् चित्तविनोदनं भवेत् तावदेव करणीयम्। अपरस्य धनम् ऋणरूपेण स्वीकृत्य भोगादिकं नैव कर्तव्यम् इति।

**श्लोकः - २**

अर्थमनर्थं भावय नित्यं नास्ति ततः सुखलेशः सत्यम्।
पुत्रादपि धनभाजां भीतिः सर्वत्रैषा विहिता नीतिः।।

**सरलार्थः**

अर्थं वित्तम्, अनर्थं विपदः कारणम् इति नित्यं सर्वदा, भावय चिन्तय, यतो हि सत्यं यथार्थमेव, नास्ति न तिष्ठति ततः धनात् सुखलेशः सुखस्य आभासः अपि । सर्वत्र एषा नीतिः विहिता, आचारः ज्ञायते । का सा नीतिः, कः सः आचारः इति चेद् उच्यते – धनभाजां धनवताम् पुत्राद् स्वपुत्रात् अपि भीतिः भयं भवति इति।

**तात्पर्यार्थः**

अर्थः सर्वदा अनर्थम् एव करोति। अधिकार्थात् सुखं न भवति। यतो हि अर्थस्य प्राचुर्यं यदि भवति तर्हि मनसि शान्तिः न भवति। लोके एवं दृश्यते यत् यः अधिकधनवान् तस्य स्वस्य पुत्रात् भार्यायाः अपि भयं भवति, ते अपि धनं यथा न स्वीकुर्यात्। किञ्च, गृहे अधिकार्थः तिष्ठति चेत् निद्रा अपि न भवति। तस्मात् अर्थेन सुखं नास्त्येव। तस्मात् गोविन्दं भज इति।

**श्लोकः - ३**

का ते कान्ता कस्ते पुत्रः संसारोऽयमतीव विचित्रः।
कस्य त्वं कः कुतः आयातस्तत्त्वं चिन्तय यदिदं भ्रातः।।

**सरलार्थः**

ते तव, का कान्ता भार्या का? ते तव, कः पुत्रः सुतः? अयं संसारः दृश्यमानः क्षणस्थायी प्रपञ्चः, अतीव अत्यन्तम्, विचित्रः अद्भूतः। त्वं कस्य कः? कुतः कस्मात् स्थानात् आयातः अगतवान् (इति ज्ञातुं शक्नोषि) यदि भ्रातः सखे, त्वं तत्त्वं यथार्थज्ञानं चिन्तय ज्ञास्यसि।

**तात्पर्यार्थः**

जगति न कोऽपि केनापि जनेन सह केनापि सम्बन्धेन न कुत्रापि सम्बद्धः। तस्मात् अयं मे पुत्रः इयं मे भार्या इति यत् ज्ञानं तत् सर्वं मिथ्याभूतम्। अयं यः संसारः दृश्यते सः अतीव विचित्रः यतो हि अयं सत्यरूपेण दृश्यते परन्तु अस्य स्वल्पा अपि सत्यता नास्ति। तस्मात् यदि तत्त्वस्य चिन्तनं क्रियते तर्हि ज्ञातुं शक्यते यत् अहं कस्यापि न। किञ्च एतद् अपि ज्ञायते यत् मम वास्तविकः परिचयः कः। तस्मात् एतत् तत्त्वं ज्ञातुं गोविन्दं भज इति।

**श्लोकः - ४**

मा कुरु धनजनयौवनगर्वं हरति निमेषात्कालः सर्वम्।
मायामयमिदमखिलं हित्वा ब्रह्मपदं त्वं प्रविश विदित्वा।।

**सरलार्थः**

धनजनयौवनगर्वं धनेषु मनुष्येषु स्वस्य यौवनावस्थायाम् अपि मा नैव गर्वम् अहङ्कारं कुरु, (यतो हि) कालः महाकालः निमेषात् हठात् एव सर्वं समस्तं हरति स्वीकरोति। इदं व्यापृतं, अखिलं समस्तं मायामयं जगत्, हित्वा त्यक्त्वा, त्वं सखे, ब्रह्मपदं ब्रह्मस्वरूपम् आत्मस्वरूपात् अभिन्नं, विदित्वा ज्ञात्वा तदेव ब्रह्मपदम् मोक्षाख्यम् परमपुरुषार्थम् प्रविश, मुक्तः भव। तत्साधनाय त्वं गोविन्दं भज इति।

**तात्पर्यार्थः**

धनम् अनुचराः स्वस्य यौवनावस्था च पद्मपत्रे स्थितं पयः इव क्षणस्थायि। तस्मात् एषु विषयेषु कदापि गर्वः नाम आत्मीयत्वबुद्धिः दम्भश्च न करणीयः। यतो हि सर्वं कालस्य अधीने एव वर्तते। कालः स्वेच्छया एकस्मिन् क्षणे सृजति परस्मिन् क्षणे एव नाशयति च। तस्मात् सखे, मिथ्यामायावृतम् इदम् अखिलं जगत् त्यक्त्वा ब्रह्मानन्दं प्राप्तुं आत्मज्ञानं लभस्व। तत्प्राप्त्यर्थं त्वं गोविन्दं भज इत्यर्थः।

**श्लोकः - ५**

कामं क्रोधं लोभं मोहं त्यक्त्वात्मानं भावय कोऽहम्।
आत्मज्ञानविहीना मूढास्ते पच्यन्ते नरकनिगूढाः।।

**सरलार्थः**

कामं वासनां, क्रोधं द्वेषम्, लोभम् अभिलाषम्, मोहं प्रीतिम्, त्यक्त्वा वर्जयित्वा अहं कः इति आत्मानं स्वं भावय चिन्तय। ये आत्मज्ञानविहीनाः आत्मनः ज्ञानं येषां न वर्तते ते मूढाः अविवेकिनः नरकनिगूढाः पच्यन्ते अहरहः दुःखं प्राप्नुवन्ति इति।

**तात्पर्यार्थः**

सम्पूर्णः अयं संसारः कामक्रोधादिना परिपूर्णः अस्ति। कामं नाम स्त्रीधनादीनाम् उपभोगेच्छा, विद्वेषः अभिलाषः किञ्च कस्याश्चित् कस्यचिद्वा उपरि प्रीतिः - इत्येतत्सर्वम् अनित्यम् एव। तस्मात् एतत् सर्वं त्यक्त्वा सर्वदा विचारणीयं यत् अहं कः नाम मम स्वरूपं किम् इति। यतो हि ये आत्मानं न जानन्ति ये प्रत्यहं नरके यथा दुःखं भवति तथा दुःखं प्राप्नुवन्ति। तस्मात् दुःखात् परित्राणं प्राप्तुं गोविन्दं भज इत्यर्थः।

**श्लोकः - ६**

सुरमन्दिरतरुमूलनिवासः शय्या भूतलमजिनं वासः।
सर्वपरिग्रहभोगत्यागः कस्य सुखं न करोति विरागः।।

**सरलार्थः**

सुरमन्दिरे देवालये वा तरुमूले वृक्षस्य अधः वा निवासः अवस्थानम्, भूतलं पृथिवी, शय्या शयनस्थानम्, अजिनं मृगचर्म, वासः वस्त्रम्, सर्वपरिग्रहभोगत्यागः सर्वेषां परिग्रहाणां भोगानां च त्यागः, तेषु विरागः वैराग्यं च, कस्य मनुष्यस्य, सुखम् आनन्दम्, न करोति। सर्वस्यापि सुखं करोति एव इत्यर्थः।

**तात्पर्यार्थः**

भोगवासनादिकं त्यक्त्वा धनादौ लोभं च परित्यज्य मन्दिरे वृक्षस्य अधः वा शयने भूमौ अवस्थाने किञ्च मृगचर्मणः परिधाने वित्तलोभादीनां कष्टं नैव सोढव्यं भवति। एवमेव यः किमपि न स्वीकरोति, भोगादिकं त्यजति किञ्च तस्य भोगविषयेषु वैराग्यं भवति, स एव वस्तुतः सुखी। तस्मात् सुखं प्राप्तुं गोविन्दं भज इत्यर्थः।

**श्लोकः - ७**

शत्रौ मित्रे पुत्रे बन्धौ मा कुरु यत्नं विग्रहसन्धौ।
भव समचित्तः सर्वत्र त्वं वाञ्छस्यचिराद्यदि विष्णुत्वम्।।

**सरलार्थः**

यदि अचिराद् शीघ्रमेव विष्णुत्वं मोक्षं वाञ्छसि प्राप्तुम् इच्छसि, तर्हि शत्रौ अरौ, मित्रे सुहृदि, पुत्रे सुते, बन्धौ स्वजने,  विग्रहसन्धौ विग्रहे युद्धे, सन्धौ मेलने च यत्नं प्रयत्नं मा नैव कुरु विधेहि। सर्वत्र त्वं समचित्तः समानमनस्कः भव तथा भूत्वा तिष्ठ इति।

**तात्पर्यार्थः**

शत्रुमित्रादयः मिथ्याभूताः एव। शत्रुणा सह युद्धेन, मित्रेण सह सख्येन, पुत्रे वात्सल्येन, तथा बन्धुना सह आलापेन समयः नष्टः भवति। किञ्च, केनापि सह युद्धं यदा क्रियते किञ्च सन्धिः क्रियते तदा तेनैव समयः गच्छति। तस्मात् तत्र यत्नः समयव्ययः न करणीयः। सर्वत्र सुखे दुःखे, द्वन्द्वे अनुरागे च समानरूपेण तिष्ठति चेत् सः विष्णुत्वं नाम मोक्षं प्राप्नोति। तादृशं मोक्षं प्राप्तुं गोविन्दं भज इत्यर्थः।

**श्लोकः - ८**

त्वयि मयि चान्यत्रैको विष्णुर्व्यर्थं कुप्यसि सर्वसहिष्णुः।
सर्वस्मिन्नपि पश्यात्मानं सर्वत्रोत्सृज भेदज्ञानम्।।

**सरलार्थः**

त्वयि सखे तव अन्तः, मयि मम अन्तश्च अन्यत्र अन्येषु सर्वेषु जनेषु, एकः विष्णुः एकं ब्रह्म, (वर्तते)। (ततः) व्यर्थम् अकारणं कुप्यसि कोपं करोषि, (अतः) सर्वसहिष्णुः सर्वविधं सोढुं यथा मनः भवेत् तथा भव। सर्वस्मिन् सर्वलोकेषु, अपि इतरजन्तुषु च, आत्मानं स्वस्य स्वरूपं, पश्य अवलोकय, सर्वत्र सर्वविधसंसारव्यवहारेषु, भेदज्ञानम् इदं मम इदं तव इत्यादिभेदबुद्धिम्, उत्सृज परित्यज इति।

**तात्पर्यार्थः**

सर्वं खलु इदं ब्रह्म। सर्वस्मिन् शरीरिणि एकं ब्रह्मैव वर्तते। तेन कस्यचिद् उपरि क्रोधः नाम स्वस्य उपरि एव क्रोधः। क्रोधेन पुनः आत्मज्ञानं विस्मरिष्यते। तस्मात् क्रोधः व्यर्थः, स च न करणीयः। यतो हि क्रोधादिकम् अनर्थकमेव तस्मात् सर्वसहिष्णुः भवसि चेत् क्रोधलोभादिकं नैव भवेत्। किञ्च सर्वत्र स्वस्य आत्मानं पश्य, तेन भेदाभेदज्ञानम् इदं मम कृते, इयं मम , इयं तव इत्यादिकं नश्यति। सर्वत्र आत्मोपलब्धये गोविन्दं भज इत्यर्थः।

**श्लोकः - ९**

नलिनीदलगतसलिलं तरलं तद्वज्जीवितमतिशयचपलम्।
विद्धि व्याध्यभिमानग्रस्तं लोकं शोकहतं च समस्तम्।।

**सरलार्थः**

यथा नलिनीदलगतसलिलं नलिनीदले पद्मपत्रे, गतं स्थितम्, सलिलं जलम्, तरलं क्षणस्थायि, तद्वद् तथैव, जीवितं जीवनम्, अतिशय अत्यन्तं चपलम् चञ्चलम्। व्याध्यभिमानग्रस्तं व्याधिना ज्वरादिरोगव्यथया अभिमानेन स्वयशःकीर्त्यादिसम्बद्धं शोकगतं दुःखभरितं समस्तम् अखिलं लोकं जगत् विद्धि जानीहि इति।

**तात्पर्यार्थः**

पद्मपत्रे जलं क्षणिकं यावत् अपि न तिष्ठति। एवमेव मनुष्याणां जीवनम् अपि अत्यन्तं चञ्चलं नाम अधुना अस्ति परन्तु श्वः नापि स्थातुम् अर्हति। समस्तः अयं संसारः रोगादिना व्यस्तः किञ्च अभिमानप्रीतिद्वेषादिव्याप्तः। अपि च अयं शोकेन परिपूर्णः। अत्र संसारे दुःखमेव सर्वदा लभ्यते, यत्किञ्चित् सुखं प्राप्यते तदपि परं दुःखमेव दास्यति। तस्मात् एतत् सर्वं जानीहि किञ्च अस्मात् मुक्तिं चिरसुखं प्राप्तुं च त्वं गोविन्दं भज इत्यर्थः।

**श्लोकः - १०**

का तेऽष्टादशदेशे चिन्ता वातुल तव किं नास्ति नियन्ता।
यस्त्वां हस्ते सुदृढनिबद्धं बोधयति प्रभवादिविरुद्धम्।।

**सरलार्थः**

वातुल उन्मत्त जीव, ते तव अष्टादशदेशे अष्टादशविषयेषु, का कीदृशी चिन्ता व्याकुलता? तव नियन्ता प्रभुः किं नास्ति न वर्तते ? यः तव हस्ते पाणिद्वयं सुदृढनिबद्धं सम्यक्तया बद्धम्, त्वां प्रभवादिविरुद्धं प्रभवादिभ्यः जननमरणादिविकारेभ्यः विरुद्धं पृथक् आत्मतत्त्वम्, बोधयति ज्ञापयिष्यति ? इति।

**तात्पर्यार्थः**

जगदिदम् ईश्वराधीनम्। साधारणः जीवः बहुधा विचिन्त्य बहुधा श्रमं सम्पाद्य अपि अस्य जगतः किमपि परिवर्तनं कर्तुं न शक्नोति। परन्तु मानवः चिन्तयति यत् स जगतः परिवर्तनं करिष्यति इति। तस्मात् हे अविवेकिन्, तव अष्टादशदेशे नाम सर्वेषां विषयेषु या चिन्ता सा अनर्थिका एव। किञ्च सर्वस्यापि नियन्ता भगवान्। तस्मात् तवापि नियन्ता वर्तते। स तव हस्तादिकं सुदृढतया बद्ध्वा त्वां बोधयति यत् जननमरणादयः ये विकाराः ते नश्वराः एव, एतेभ्यः पृथग्भूतं यत् ब्रह्मज्ञानं तदेव आत्यन्तिकदुःखनाशकम्। तस्मात् तत् ज्ञानं प्राप्तुं त्वं गोविन्दं भज इत्यर्थः।

**श्लोकः - ११**

गुरुचरणाम्बुजनिर्भरभक्तः संसारादचिराद् भव मुक्तः।
सेन्द्रियमानसनियमादेवं द्रक्ष्यसि निजहृदयस्थं देवम्।।

**सरलार्थः**

गुरुचरणाम्बुजनिर्भरभक्तः गुरुचरणाम्बुजयोः निर्भरम् भक्तः इति । निर्भरभक्तियुक्तः इत्यर्थः। निर्भरभक्तिः इत्यस्य परिपूर्णभक्तिः इत्यर्थः। अचिरात् शीघ्रमेव, संसारात् मायावृतात्, मुक्तः पाशरहितः भव। सेन्द्रियमानसनियमात् इन्द्रियैः सह मनसः अपि संयमेन, निजहृदयस्थं स्वस्मिन् अवस्थितम् देवं परमेश्वरम्, द्रक्ष्यसि साक्षात्कर्तुं शक्नोषि इति।

**तात्पर्यार्थः**

यस्य देवे परा भक्तिः यथा देवे तथा गुरौ। तस्यैव कथिता ह्यर्थाः प्रकाशन्ते महात्मनः।। अर्थात् स्वस्य गुरौ परमेश्वरे च यस्य परा नाम अनन्या भक्तिः वर्तते, स एव आत्मज्ञानं प्राप्स्यति इति। तस्मात् गुरुं प्रति श्रद्धायुक्तः भव। कीदृशी श्रद्धा ? उच्यते – गुरौ निर्भरता स्वस्य शरीरविषये अपि सम्पूर्णतया स्वत्वं परित्यज्य गुरुः यत् वदति तत् सत्यमेव इति प्रगाढः विश्वासः इति। तादृशःगुरौ श्रद्धावान् भक्तिमान् च संसारात् मायावृतात् जगतः शीघ्रमेव मुक्तिं प्राप्स्यति। तस्मात् त्वं तादृशः भूत्वा

शीघ्रमेव मोक्षं लभस्व। किञ्च इन्द्रियैः सह मनसः संगमनं नाम निग्रहः अपेक्षते। अर्थात् शमादिसम्पन्नः भव। तेन त्वं स्वस्मिन् स्थितं परमात्मानं द्रष्टुं शक्नोषि। तत्प्राप्त्यर्थं त्वं गोविन्दं भज इत्यर्थः।

**श्लोकः - १२**

द्वादशपञ्जरिकामय एष शिष्याणां कथितो ह्युपदेशः।
येषां चित्ते नैव विवेकस्ते पच्यन्ते नरकमनेकम्॥

**सरलार्थः**

एषः श्लोकबद्धः द्वादशपञ्जरिकामयः द्वादशपञ्जरिकास्तोत्ररूपः हि निश्चयेन शिष्याणाम् अन्तेवासिनाम् (कृते) कथितः उक्तः उपदेशः कृत्याकृत्यविवेकबोधः। येषां नराणां चित्ते मनसि विवेकः विचारः नैव कदाचित् नास्ति ते मूढाः नरकम् अत्यन्तदुःखमूलम् अनेकं बहुवारं पच्यन्ते संसारं प्रविशति इति।

**तात्पर्यार्थः**

इयं स्तोत्रमाला भगवच्चरणैः श्रीशङ्कराचार्यैः शिष्याणां नाम तेषां साक्षात् शिष्याणां किञ्च परम्परया अस्माकं कृते कृत्याकृत्यविवेकविषये उपदेशमुखेन उक्ता। ये श्रद्धान्विताः भूत्वा विश्वासं कृत्वा आत्मज्ञानलाभाय यत्नं करिष्यन्ति, ते अवश्यं मुक्ताः भविष्यन्ति। परन्तु येषां चित्ते ज्ञानोदयः न भविष्यति ते जननमरणादिचक्रैः बद्धाः सन्तः पुनः पुनः दुःखमूलं संसारम् आगमिष्यन्ति, दुःखादीनां भोगं करिष्यन्ति च। तस्मात् एतस्मात् संसारदुःखात् मुक्तिं प्राप्तुं त्वं गोविन्दं भज इत्यर्थः।

**स्तोत्रगम्भीरार्थसारः**

परमकारुणिकाः भगवन्तः श्रीशङ्कराचार्याः सर्वेषां कृते ज्ञानोदयार्थं स्तोत्रम् इदं रचितवन्तः। अस्मिन् स्तोत्रे प्रतिपादं ते संसारस्य अनित्यताम्, तत्र दुःखमेव मूलम्, एतस्मात् मुक्तये गोविन्दस्य अर्थात् परब्रह्मणः विषये बुद्धिं स्थिरीकर्तुम् उक्तवन्तः। धनजनस्त्रीपुत्रादिषु आत्मत्वबुद्धिः नैव करणीया। यतो हि केनापि सह कस्यापि सम्बन्धः नास्ति। तस्मात् संसारविषयेषु अहम्भावः न स्यात्। किञ्च यावत् सत्कर्मणा उपार्जनं क्रियते तेन स्वस्य जीवनयापनं कर्तव्यम्। अपि कामक्रोधादिना सर्वे मत्ताः। ते चिन्तयन्ति यत् जगत् तेषाम् अधीने वर्तते इति। एवंविधाः अज्ञानिनः प्रत्यहं दुःखैः बहुधा दुःखिताः भूत्वा नरककष्टम् अनुभवन्ति। किञ्च सर्वदा समचित्तेन भवितव्यम्। अर्थात् सुखे दुःखे कदापि तत्र लिप्तेन न भवितव्यम् इति। किञ्च जीवनमिदं पद्मपत्रे स्थितं जलमिव। कदापि गमिष्यति इति न कश्चन वक्तुं शक्नोति। तस्मात् शीघ्रमेव ब्रह्मणः चिन्तादिकं कृत्वा आत्मनः मोक्षः साधनीयः। इदं स्तोत्रं पठित्वा यः गुरौ श्रद्धावित्तः भूत्वा ब्रह्मज्ञानलाभार्थं प्रयत्नं करिष्यति तस्य अनन्तसुखप्राप्तिः मुक्तिश्च भविष्यति इति विषयं बोधयितुं भगवन्तः स्तोत्रमिदं रचितवन्तः इति शिवम्।

जीवनकथा

# श्रीविद्यारण्यस्वामिनः

## सौरभ-पोडेलः

अविद्यारण्यकान्तारे भ्रमतां प्राणिनां सदा।
विद्यामार्गोपदेष्टारं विद्यारण्यगुरुं श्रये।।

**जन्म, वंशपरिचयः वाल्यकालश्च -** माधवः(श्रीविद्यारण्यस्वामिनः साधारणतः स्वीकृतं पूर्वाश्रमस्य नाम) षण्णवत्युत्तरद्वादशशतोत्तरे ईशवीयाब्दे(१२९६) पम्पानदीतीरे अवस्थितायाः एकसिला इत्येतन्नामिकायाः (संप्रति वरंगल इत्येतन्नामकेन प्रसिद्धायाः) नगर्याः एकस्मिन् दरिद्रे विदुषि ब्राह्मणपरिवारे अजायत। तस्य पितुर्नाम आसीत् मायणाचार्यः। स वैदिकधर्मपरायणः सदाचारसम्पन्नश्चासीत्। तस्य मातुर्नाम आसीत् श्रीमतिदेवी। सापि धर्मपरायणा, सुशीला चासीत्। परन्तु सर्वसुखसम्पन्नौ तौ सुतसम्पद् विना दुःखपरायणौ तिष्ठतः स्म। अतः पुत्रलाभार्थं प्रायः एव ताभ्यां तपस्तप्तम्, तीर्थयात्रा अनुष्ठिता, देवपूजा च विहिता। तयोस्तादृशेन घोरतपसा भगवान् प्रसन्नः सन् तयोर्मनोरथम् असम्पादयत्, दैवानुग्रहाच्च श्रीमतिदेवी अचिरादेव सुतमेकम् असूत। तेन तौ दम्पती सन्तुष्टौ जातौ। तदनन्तरं मायणाचार्यः जातपुत्रस्य जातकर्मादिसंस्कारान् सर्वं यथाविधि यथासमयं सम्पाद्य एकादशे अहनि 'माधव' इति संज्ञया तस्य नामकरणसंस्कारं सम्पादयामास। ततः केभ्यश्चिद्दिवसेभ्योऽनन्तरं तस्य सायणभोगनाथनामकौ द्वौ सहोदरौ अजनिषाताम्। वेदभाष्यकारः सायणाचार्यो भोगनाथश्च तस्य सहोदरौ अभूताम्। ते त्रयोऽपि सहोदराः सत्यपरायणा, धार्मिकाः तपोनिष्ठाः च अभवन्। राजधर्मेऽपि तेषां महत्प्रावीण्यम् आसीत्। तैः सश्रद्धं प्रायः समग्रस्य वेदस्याधयनं कृतमासीत्। स्वकीय ईदृशः परिचयः पराशरमाधवग्रन्थस्य प्रारम्भश्लोकेन दत्तः -

श्रीमती जननी यस्य सुकीर्तिर्मायणः पिता।
सायणो भोगनाथश्च मनोबुद्धी सहोदरौ।।
बौधायनं यस्य सूत्रं, शाखा यस्य च याजुषी।
भारद्वाजं यस्य गोत्रं, सर्वज्ञः स हि माधवः।।

एवं प्रारम्भश्लोकाभ्यां विज्ञायते यत् माधवाचार्यस्य सूत्रस्य नाम आसीत् बौधायनं, वेदशाखायाः नामासीत् याजुषी, गोत्रस्य च नामासीत् भारद्वाजमिति।

परन्तु तदानीं त्रयोदशशतके (१३००) तुरूष्काणाम् आक्रमणेन हिन्दवः सन्त्रस्ता बभूवुः। तुरूष्कैः अस्मद्देशीयाः नारीः प्रति कृतमत्याचारं भारतीयधनानां लुण्ठनं च दृष्ट्वा माधव उद्विग्नमनाः भूत्वा अस्माकं भारतीयायाः संस्कृतेः सम्पत्तेश्च रक्षणार्थं कृतसंकल्पोऽभूत्।

**बाल्यकालादनन्तरं सन्न्यासजीवनप्रारम्भः -** परंपराप्राप्तं तथ्यमेवम् अस्ति, श्रीविद्यारण्यस्वामिनः द्वावनुजौ तु आस्ताम्, परन्तु श्रीविद्यारण्यः नासीत् सायणाचार्यभोगनाथयोः अग्रजः अपि तु तौ सायणाचार्यभोगनाथौ श्रीविद्यारण्य-स्वामिनः शिष्यौ अभूताम्। श्रीविद्यारण्यस्वामिनः वेदस्य कस्यचिद्भागस्य भाष्यं व्यररचत् सायणाचार्यः तदसम्पूर्णं कार्यं समापितवान्। श्रीविद्यारण्यस्वामिनः (माधवस्य) अनुजयोर्मध्ये कश्चिच्छुद्धज्ञानस्य अन्वेषणं कुर्वन् दक्षिणभारतं प्रति अगमत्। तत्र स इतस्ततः अटन् शृंगगिरौ विद्यमानं

दक्षिणाम्नायपीठं प्रापत्। तदानीन्तने समये श्रीविद्याशंकरतीर्थभगवत्पादाः मठाध्यक्षाः बभूवुः। तत्र गत्वा स संस्कृतपठनार्थं प्रार्थनां चकार। वाल्यकालतः एव ब्रह्मचारिव्रतपालनेन तस्मिन् विद्यमानान् सर्वान् गुणान् तथा तस्योपस्थितिं बुद्धिं दृष्ट्वा श्रीविद्याशंकरतीर्थभगवत्पादाः तस्मै भारतकृष्णतीर्थ इति सन्न्यासनाम्ना दीक्षां प्रादात्। माधवः अपि स्वस्यानुजस्य अन्वेषणं कुर्वन् इतस्ततः अटन् शृंगगिरिं प्राप्य स्वस्य कनिष्ठभ्रातरं भारती-कृष्णतीर्थनामकेन सन्न्यासिरूपेण प्राप्तवान्। ततः भारतीकृष्णतीर्थमहाराजैः प्रार्थिताः सन्तः श्रीविद्याशंकर-तीर्थभगवत्पादाः एकत्रिंशदुत्तरत्रयोदशशततमे(१३३१) ईशबीयाब्दे अरण्यमिव गभीरज्ञानवते माधवाय विद्यारण्य इति सन्न्यासनाम्ना दीक्षां अदुः। तदनन्तरं वयोनुसारं कनिष्ठे सत्यपि घोरतपसः परिपालनेन श्रीभारती-कृष्णतीर्थस्वामी वरिष्ठश्रीपाद इत्येतन्नाम्ना, श्रीविद्यारण्यस्वामी च कनिष्ठपाद इत्येतन्नाम्ना ख्यातौ अभूताम्।

**सन्न्यासग्रहणात्परं जीवनम्-** सन्न्यासग्रहणात्परं श्रीविद्यारण्यस्वामिनः तीर्थयात्रां प्रारब्धवन्तः। तीर्थयात्रां कुर्वन् सः काशीमगमत्। तत्र सः बद्रीकाश्रमं प्रापत्। तस्मिन् बद्रीकाश्रमे कश्चिन्महान् ऋषिः तस्मै श्रीविद्यां शिक्षितवान्। तदनन्तरं यदा स दक्षिणदेशं प्रति पुनः प्रत्यागच्छति स्म तदा हाम्पिनामके एकस्मिन् स्थाने सः ध्यानमग्नः अभूत्। तदा एव सायणभोगनाथौ श्रीविद्यारण्यस्वामिनः समीपमागत्य तस्य शिष्यत्वमाशीर्वादञ्च प्रार्थितवान्। श्रीविद्यारण्यस्वामिनः तदा स्वरचितं असंपूर्णवेदभाष्यं अन्यद्विशिष्टानि शास्त्रविषयकाणि ज्ञानानि च दत्त्वा तानि कार्याणि पूरयितुम् आशीर्वादञ्च प्रादात्। परवर्तिकाले तौ विजयनगरसाम्राज्यस्य मन्त्रिरूपेण नियुक्तौ सन्तौ वेदभाष्यस्य तेषां शास्त्रकार्याणां च प्रचारकार्यमकुरुतम्। तस्मिन्नेव समये श्रीविद्याशंकर-तीर्थस्वामिनः लम्बिकायोगं प्रविश्य महासमाधिं प्राप्नोत्। अतः श्रीभारतीकृष्णस्वामिनः शृंगगिरौ विद्यमानस्य मठस्य एकादशतमाध्यक्षरूपेण नियुक्ताः। श्रीभारतीकृष्णस्वामिनः त्रयस्त्रिंशदुत्तरत्रयोदशशततमात्(१३३३) ईशवीयाब्दात् अशीत्युतरत्रयो-दशशततमम् ईशवीयाब्दपर्यन्तं मठाध्यक्षाः आसन्। श्रीभारतीकृष्णस्वामिनः विदेहमुक्तेरनन्तरं श्रीविद्यारण्यास्वामी शृंगगिरिमठस्य द्वादशमठाध्यक्षरूपेण नियुक्तः सन् अशीत्युत्तरत्रयोदश-शततमादीशवीयाब्दात्(१३८०) आरभ्य षडशीत्युतरत्रयोदशशततमम् ईशवीयाब्दपर्यन्तं जगद्गुरुरूपेण अतिष्ठत्।

**विजयनगरसाम्राज्यस्य प्रतिष्ठापनम्-** विद्यारण्यस्वामिनः विजयनगरसाम्राज्यस्य प्रधानशासकाः आसन्। ते एव अस्य साम्राज्यस्य संस्थापनार्थं नायकभूमिकां पर्यपालयत्। किञ्चित्कथानुसारम् हरिहररायबुक्करायनामकौ कम्पिलिराज्यस्य शासकौ द्वौ भ्रातरौ आस्ताम्। यदा यवनैः कम्पिलिप्रदेशः अधिकृतः तदा समग्रं कम्पिलिप्रदेश ईशलाम्धर्मेण परिवर्तितो यवनानां बलेन। तौ हरिहररायबुक्करायनामकौ भ्रातरावपि ईशलामधर्मेण दीक्षितौ यवनानां बलेन। परन्तु एवं श्रूयते यत् तौ द्वौ श्रीविद्यारण्यस्वामिना पुनः हिन्दुधर्मेण दीक्षितौ। तदनन्तरमस्य राज्यस्य शासकत्वेन नियुक्तौ अभूताम्। परन्तु विजयनगरपरिवर्तिनः शासकाः एतस्मिन् विषये न किञ्चिदुल्लिखितवन्तः तस्मादेषा कथा शंकापूर्णा।

अपरा काचित्कथापि श्रूयते। तत्काथानुसारम् एकदा मृगयासमये हरिहररायः एकं शशकं दृष्ट्वा स्वशुनकं तं शशकं घ्नन्तुमप्रेषयत्। परन्तु सः शशक एव तस्य कुक्कुरस्य दशनं कृत्वा ततो निर्गतः। हरिहररायः तं वृत्तान्तं दृष्ट्वा चकितः सन् दिव्यगुणसम्पन्नं कश्चिन्महापुरुषं दृष्ट्वा तस्मै सर्वं न्यवेदयत्। सः दिव्यगुणसम्पन्नः जनः आसीत् श्रीविद्यारण्यस्वामी। ततः तौ द्वौ यत्र तद्विचित्रं दृश्यं जातं तत्र गतवन्तौ। श्रीविद्यारण्यस्वामिनः

तत्स्थानमतिपवित्रमिति कथयित्वा तत्र विजयनगरसाम्राज्यस्य राजनगरीस्थापनाय आदिष्टवन्तः। तदनन्तरं हरिहररायः तत्र विजयनगरस्य राजनगरीं प्रास्थापयत्।

परन्तु सिद्धान्तस्तु एवं मन्यते यत् श्रीविद्यारण्ययतिः तुङ्गभद्रातीरे तिष्ठन् अराजके तस्मिन् राज्ये राजानं समीक्षमाणः आसीत् । तदैव कदाचित् युवानौ आगतौ । तौ च यदुवंशजातौ, शौर्यसम्पन्नौ, राजलक्षणयुतौ सुन्दरौ, सूर्यचन्द्राविव कान्तियुक्तौ आस्ताम् । तावेव हरिहररायबुक्करायनामानौ । तौ यतिं श्रीविद्यारण्यम् उपसृत्य सप्रणामम् एवम् अवदताम् - "आवाम् अस्य राज्यस्य राजवंशीयौ, सम्प्रति राज्यकोषाभ्यां विहीनौ अटन्तौ स्वः" ।

यतिर्विद्यारण्यः ताभ्याम् उक्तं विषयं श्रुत्वा समीहितं सिद्धम् इति अमन्यत । अतः तौ शिष्यत्वेन स्वीकृतवान् । श्रीविद्यारण्येन शिक्षितौ तौ । सर्वराजगुणपरिपूर्णौ प्रजानुरागिणौ च अवर्धताम् । तौ पूरस्कृत्य षट्त्रिंशदधिकत्रयोदशशततमे ईशवीयाब्दे (१३३६) अस्थापयन् च स्वतन्त्रं साम्राज्यम् । भूमिरियं वीरबहुलेति मत्वा तस्य साम्राज्यस्य 'विजयनगरम्' इति सार्थकं नाम अकरोत् । तत्रैव राजगुरुः विद्यारण्यः हरिहररायं राज्ये सिंहासने प्रतिष्ठाप्य अभिषिक्तवान् । श्रीविद्यारण्येन उपदिष्टं मार्गम् अनुसरन् हरिहरः निरातङ्कं प्रजाः पर्यपालयत् । हरिहरे राज्यं शासति सति प्रजाजनाः सर्वे सुखिनः धर्मरताश्च जीवनम् अकुर्वन् । तदा वाणिज्यम् अतिशयेन अवर्धत । कृषिक्षेत्रं समृद्धिम् अलभत । साहित्यं कला संस्कृतिश्च नितराम् उन्नतिम् अवाप । अत एव भरतखण्डे विजयनगरसाम्राज्यकालः 'सुवर्णयुगम्' इति प्रथितः ।

**श्रीविद्यारण्यस्वामिनः कृतयः -** राजनीतिज्ञानां प्रबन्धलेखनपटूनां व्याकरणसाहित्यदर्शनवेदान्तादिनिखिल-शास्त्रज्ञानां तेषां प्रतिभा तत्प्रणीतग्रन्थानामवलोकनेन ज्ञायते। तद्रचितग्रन्थानां कश्चित् संग्रहः अधः प्रदर्श्यते-

| विषयः | ग्रन्थनाम |
|---|---|
| व्याकरणम् | माधवीयधातुवृत्तिः |
| मीमांसा | जैमिनीन्यायमाला |
| स्मृतिः | पराशरसंहितामवलम्ब्य 'पराशरमाधव'नामकः ‘कालमाधव’नामकश्च प्रबन्धौ |
| दर्शनम् | सर्वदर्शनसंग्रहः |
| काव्यम् | शङ्करदिग्विजयः |
| पुराणम् | स्कन्दपुराणान्तर्गतसूतसंहिताया अद्वैततत्त्वप्रकटनपटीयसी विशदटीका |
| वेदान्तः | विवरणप्रमेयसंग्रहः, बृहदारण्यकवार्तिकसारः, पञ्चदशी, जीवन्मुक्तिविवेकः, अनुभूतिप्रकाशः, अपरोक्षानुभूतिटीका, ऐतरेयोपनिषद्दीपिका, तैत्तिरीयोपनिषद्दीपिका, छान्दोग्योपनिषद्दीपिका |

एतेन ज्ञायते यत्तेषु महात्मसु युगपत् कवित्वदार्शनिकत्वराजनीतिज्ञत्वतत्त्वनिष्ठत्वमहासंग्रहित्व-पूर्णत्यागित्वादयो मिथो विरुद्धा अपि सहचरिता एवाभूः।

**सर्वदर्शनसंग्रहः -** सर्वदर्शनसंग्रहग्रन्थे तैर्ये षोडश परम्पराः आलोचिताः ते तावत्-१) चार्वादर्शनम् २) योगदर्शनम् ३) आर्हतदर्शनम् ४) रामानुजदर्शनम् ५) पूर्णप्रज्ञदर्शनम् ६) नाकुलिसापाशुपतदर्शनम् ७) शैवदर्शनम् ८) प्रत्यभिज्ञादर्शनम् ९) रसेस्वरदर्शनम् १०) औलुक्यदर्शनम् ११) अक्षपाददर्शनम् १२) जैमिनीयदर्शनम् १३) पाणिनीयदर्शनम् १४) साङ्ख्यदर्शनम् १५) पातञ्जलदर्शनम्।

शांकराद्वैतावलम्बिनः श्रीविद्यारण्यस्वामिनः स्वकीयसर्वदर्शनसङ्ग्रहग्रन्थे शांकराद्वैतस्य व्याख्यानं न चक्रुः। अत एव पञ्चदशाध्यायस्य अन्तिमे तैरेवोक्तं यत् यः अद्वैतवेदान्तः अत्र वर्णितः सर्वशास्त्राणाम् उत्तराधिकारी सर्वप्रणालीनां शिखामणिरिव मया अन्यत्र वर्णितोऽस्ति सः अत्र न वर्ण्यत इति।

अत्र श्रीविद्यारण्यस्वामिनः प्रत्यध्ययम् तत्कालीनैरन्यसाम्प्रदायिकैर्महापुरुषैः प्रतिपादितानि मतानि खण्डयितुं संप्रवृत्ताः। बौद्धजैनधर्मौ व्यतिरिच्य ते अन्यसाम्प्रदायिकैः कथिताः उक्तीः उद्धृतवन्तः। परन्तु ते आत्मनस्तु ग्रन्थप्रतिपादितानां षोडशविधधर्माणाम् अनुयायिनः एव अमन्यन्त।

**पञ्चदशी -** अद्वैतवेदान्तस्य मानभूतोऽयं ग्रन्थः। अस्मिन् ग्रन्थे पञ्चदश अध्यायाः त्रिकृत्वः विभक्ताः। तेन प्रतिविभागमत्र पञ्च पञ्च अध्यायाः सन्ति। तेषु विभक्तेषु भागत्रयेषु प्रथमभागस्य नाम अस्ति 'विवेकः' द्वितीयविभागस्य नामास्ति 'दीपः' तृतीयविभागस्य च नामास्ति 'आनन्दः'। अत्राद्वैतवेदान्तस्य मुख्यविषयाः आलोचिताः सन्ति, तेषु विषयेषु मुख्यस्तावदस्ति जीवेश्वरजगतां मध्ये सम्बन्धः।

**माधवीयशङ्करविजयम् -** श्रीविद्यारण्यस्वामिभिर्रचितो ग्रन्थोऽयं संक्षेपशंकरविजयमिति नाम्नापि प्रसिद्धः। अस्मिन् ग्रन्थे आदिशंकरभगवत्पादानां जीवनविषये किञ्च तेषां साफल्यविषये चालोचितम्।

**शरीरत्यागः -** श्रीविद्यारण्यस्वामिनः सप्तसप्तत्युत्तरत्रयोदशततमेशवीयाब्दात् (१३७७) षडशीत्युत्तर-त्रयोदशततमेशवीयाब्दपर्यन्तं (१३८६) शृंगगिरौ विद्यमानस्य श्रीसारदापीठस्य प्रधानाः बभूव। तेनैव सह तैः विजयसाम्राज्यप्रतिष्ठापनम्, आदिशंकरभगवत्पादैः प्रवर्तितस्य अद्वैतवेदान्तस्य कृते कार्यम्, अन्यशास्त्रमवलम्ब्य भिन्नान् ग्रन्थान् च रचयित्वा संस्कृतवाङ्मये स्वकीर्तिः सुस्पष्टतया प्रकाशिता। एकनवत्युत्तरत्रयोदशशत-तमेशवीयाब्दे (१३९१) ते महानुभवा आदिशंकरभगवत्पादानुयायिनः सर्वशास्त्रज्ञाः मायाग्रस्तमिदं संसारं परित्यज्य ब्रह्मलोकं जग्मुः इति शिवम्।

विद्याविद्याविवेकेन पारं संसारवारिधेः ।
प्रापयत्यनिशं भक्तान् तं विद्यारण्यमाश्रये ॥

जीवनकथा

# मारिया-शारापोभा

## शङ्करमण्डलः

अखिलेऽस्मिन् विश्वप्रपञ्चे लब्धकीर्तयो ये टेनिस्-क्रीडकास्तेषु अन्यतमा मारिया- शारापोभा सम्राज्ञीपदवीमवाप। सा हि १९८७ ईशवीयाब्दे एप्रिलमासस्य ऊनविंशेऽहनि राशिया-देशस्य न्यागन-प्रदेशे जनिं लेभे। यूरी-शारापोभा, येलेना च तस्याः पितरौ। चतुर्थे एव वयसि सा प्रथमतया टेनिसकन्दुके प्रहारं कृतवती। आलेक्साण्डार-काफलनिकोभेन सह तस्याः पितुः मैत्र्यं जातं, यस्य पुत्रः येभगेनिः ग्राण्डस्ल्यान्द्वयं जित्वा राशियादेशतः प्रथमतया टेनिस्-क्रीडायां विश्वस्य प्रथमं स्थानमधिकृतवान्। स एव आलेक्साण्डारमहोदयः १९९१ ईशवीयाब्दे मारियायै प्रथमं र्यकेट् इति टेनिस्-कन्दुकक्रीडनकमुपहृतवान्। ततः प्रभृति तस्याः टेनिसक्रीडाभ्यास आरब्धः। तदानीन्तने काले राशियादेशेषु ख्यातकीर्तिः टेनिसक्रीडाचार्या यूरी-युट्कीन् क्रीडन्तीं मारियां दृष्ट्वा मुग्धा जाता। तस्या एव क्रीडाविद्यालये बालिकाया मारियायाः टेनिसक्रीडापाठ आरब्धः। १९९३ ख्रीष्टाब्दे षष्ठे वयसि सा मस्कोप्रदेशे मार्टिन-नाभ्रातिलोभाचार्यायाः क्रीडाविद्यालये प्रविष्टा। तस्या एव अनुमोदनं लब्ध्वा सा अधिकप्रशिक्षणलाभार्थं पित्रा सह आमेरिकाप्रदेशं प्रस्थिता, यद्यपि भिसा-समस्यायाः कारणात् तस्या माता ताभ्यां सह गन्तुं न शशाक। तत्र फ्लोरिडाप्रदेशस्थे आइ-एम्-जि- प्रशिक्षणकेन्द्रे तस्या उच्चतरप्रशिक्षणमारब्धम्। त्रयोदशवर्षे वयसि सा आन्तर्जातिक-जुनियर-टेनिस-च्याम्पियनशिप इति प्रतियोगितां जितवती, तत्र च असामान्यप्रतिभाया निदर्शनस्थापनात् “Rising Star” (उदीयमानं नक्षत्रम्) इत्युपाधिं लब्धवती। ततः शारापोभा कदापि पश्चाद्दृष्टिं नादात्। सा “Australian Open Junior Championship” इति प्रतियोगितायामन्तिमपर्यायं गतासु कनिष्ठतमा बालिका जाता। सा तु २००५ ईशवीयाब्दे टेनिस्-क्रीडायां विश्वस्य प्रथमं स्थानमधिकृतवती। बहून् ग्राण्ड-स्ल्याम्पुरस्कारान् सा जितवती। अलिम्पिक-क्रीडायायामपि सा रौप्यपदकं लब्धवती। किन्तु दौर्भाग्यात् सा २०१६ ईशवीयाब्दे ड्राग्-परीक्षायां विफला जाता, वर्षद्वयं यावत् सा क्रीडातः निर्वासिता। किन्तु अनन्तरं तस्या अपराधस्य लघुतां परीक्ष्य तस्य दण्डकालोऽपि लघूकृतः। २०१७-ईशवीयाब्दे सा विश्वटेनिस्-प्रतियोगितायां पुनः प्रत्यावर्तनं कृतवती। इत्थं च नानाघातप्रतिघाताभ्यां परीक्षितेयं प्रतिभा अन्त्यतः २०२० ख्रीष्टाब्दस्य फेब्रुयारीमासस्य षड्-विंशेऽहनि अवसरं गृहीतवती। सेयं मारिया-शारापोभा असामान्यरूपलावण्यवशात् क्रीडाजगति टेनिस्-सुन्दरी इति नाम्नाभिधीयते।

लघुकथा

# भावान्तरम्

**भास्करदासः**

अधुना समयो हि अपराह्णस्य पञ्चघटिका । सर्वेषां कार्यालययात्रिणां कृते अयं गृहागमनकालः । सङ्गीता, पूजा, रिया अपि तदा गृहागमनाय स्टेशन इति स्थाने अपेक्षन्ते। अस्मिन्नेव समये तत्स्थाने वैद्युतिकरेलयानस्य प्रवेशो भवति । रेलशकटस्य आगमनात्परं तत्क्षणादेव ताः तत्र निर्दिष्टे आसने उपविश्य परस्परेण वार्तालापे मत्ता अभवन् ।

सङ्गीता हि एका शिक्षिका । यद्यपि शिक्षकतां विनापि सा कयाचित् नारीकल्याणसंस्थया सह युक्ता आसीत् । बाल्यकालादेव सा पुरुषविद्वेषिणी आसीत् । तस्मात् कदाचित् सा नारीकल्याणसंस्थायाः पताकया पथि दृश्यते । अपरपक्षे पूजारिये अपि कस्मिंश्चित् कार्यालये कार्यरते स्तः । एवं ताः प्रत्यहमेव अस्मिन्नेव रेलशकटे नारीणां कृते निर्दिष्टे कक्षे उपविश्य स्वीयं स्थानं प्रत्यागच्छति । अद्यापि तस्यान्यथा न भवति ।

रेलशकटम् उत्थाय प्रत्यहं पुरतस्ता उपविशन्ति । उपविश्यैव ताः वहिर्भागे अपेक्षारतानां पुरुषयात्रिणां कृते करुणादृष्ट्या पश्यन्ति । सङ्गीतया मृदु हास्यं कृत्वा मुखेन 'चुक् चुक्' इति शब्दोऽपि क्रियते। ततः रेलयानं शनैः शनैः गन्तुमारभते । अस्मिन्नेव समये तासां कक्षे एको युवा धावन् उत्तिष्ठति । उत्थाय सोऽपश्यत् यत् स महिलानां कक्षे उपस्थितः । तस्मिन् समये सङ्गीतयापि दृश्यते यत् तासां कक्षे एको युवा दण्डायमानः आसीत् । तद्दृष्ट्वा तस्याः प्रतिरक्तम् अग्निवर्षणमारभते । सा शीघ्रं तस्य युवकस्य पुरतः गत्वा पृच्छति यत् कथं स एतत्कार्यं करोति । किन्तु तस्य कोऽपि उत्तरं न श्रुत्वा तस्य गण्डे चपेटाघातमकरोत् । तदा युवकेनोच्यते आगामिनि रेलविस्थानके रेलशकटस्य अवस्थानात्परमहमन्यकक्षं गमिष्यामि । तावत्पर्यन्तं मह्यम् अस्मिन् कक्षे स्थानं देहि । तदा सङ्गीतया उच्यते यत् अहं जानामि तेषां कर्मकाण्डम् । एते सर्वे पुरुषाः समाना एव । स्वीयां वाचमसमाप्यैव सा तत्क्षणादेव तं युवकं चलमानरेलयानादधः न्यक्षिपत्। तदा पूजया उच्यते अरे युवकोऽयं जीवितो वा । सङ्गीतया उच्यते यद्भवतु , तेन अस्माकं किम् । तस्मै एतदेव उचितं कार्यम् । ततः ताः तासां आसने उपविश्य पूर्ववत् वार्तालापेन मत्ताः अभवन् । ततः तस्मिन्नेव समये सङ्गीतायाः दूरभाषे तस्याः भ्रातुः वार्ता आगच्छति । तत्र केनापि अज्ञातजनेनोच्यते - "भवत्याः परिवारे किं विवेकसेन इति नाम्ना कोऽपि सदस्यः अस्ति वा ।" तदा सङ्गीतयोच्यते – "आम्, अहं तस्य भगिनी । किन्तु कस्त्वम् ?" । उत्तररूपेण अवदत् स जनः- "भवत्याः भ्राता कयापि नार्य्या महिलाकक्षात् बहिः निक्षिप्तः। स अधुना 'मेडिकेलकलेज्' इति सेवालये अस्ति । भवती शीघ्रमेव अत्रागच्छतु ।" तच्छ्रुत्वा सङ्गीता वाग्रुद्धाभवत्। तस्याः चतुर्दिशः शनैः शनैः अन्धकाराच्छन्ना अभवन्। सा स्वस्यासनात् उत्थातुमपि न शक्नोति ।

# संख्याबन्धः

**अभीपालः**


अस्मिन् चतुष्कोणमध्ये उलम्बतः आलम्बतश्च नव प्रकोष्ठाः सन्ति। तत्र च काश्चन संख्या निर्दिष्टाः सन्ति। रिक्त-स्थानानि च उपयुक्ताभिः संख्याभिः पूरणीयानि। अत्रावधेयं यत्, प्रत्येकं सरण्यां कस्याश्चित् संख्याया द्विरावृत्तिः न स्यात्।

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| | | | | | ८ | | | ९ |
| | ५ | | | १ | | | ३ | |
| | | | ६ | २ | | | | १ |
| | | ९ | ८ | ३ | | | १ | |
| | | ६ | | | | ४ | | |
| | ३ | | | ४ | ७ | ६ | | |
| २ | | | | ५ | १ | | | |
| | १ | | | ८ | | | ७ | |
| ९ | | | ४ | | | | | |

## समाधानम्

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| १ | ६ | ४ | ३ | ७ | ८ | २ | ५ | ९ |
| ७ | ५ | २ | ९ | १ | ४ | ८ | ३ | ६ |
| ३ | ९ | ८ | ६ | २ | ५ | ७ | ४ | १ |
| ४ | २ | ९ | ८ | ३ | ६ | ५ | १ | ७ |
| ५ | ७ | ६ | १ | ९ | २ | ४ | ८ | ३ |
| ८ | ३ | १ | ५ | ४ | ७ | ६ | ९ | २ |
| २ | ४ | ३ | ७ | ५ | १ | ९ | ६ | ८ |
| ६ | १ | ५ | २ | ८ | ९ | ३ | ७ | ४ |
| ९ | ८ | ७ | ४ | ६ | ३ | १ | २ | ५ |

### कर्मरहस्यम्



कर्म कुरुत आमृत्योः – युष्माभिः सहास्मि । यदा चाहं प्रयातः स्यां ममात्मशक्तिः युष्माभिः सह सक्रिया स्यात् । एतज्जीवनम् आयाति याति च – सम्पत्तिः कीर्तिर्भुक्तयश्च कतिपयदिवसानां कृते एव । सांसारिकीट-वन्मरणात् कर्मक्षेत्रे सत्यं प्रचारयतो मरणं श्रेयः, अधिकं श्रेयः । अग्रतः सर्प ।

कर्मसम्पत्तिः सामस्त्येन युष्माकं प्रत्येकमपेक्षते इवेति मन्वानैः कर्म कार्यम् ।

महत् कर्म किमपि चातुर्येण न साधयितुं शक्यते । सर्वारम्भा हि प्राज्येन ओजसा सम्पाद्यन्ते । अतो युष्माकं मनुष्यत्वं विकचयत ।

जनौघः कमप्युपयोगं न निर्वहति । एकशताब्द्या जनानां महासंघट्टेन यत् सम्पाद्यते तस्मादधिकतरं क्रियते कतिपयैः प्राणवद्भिः अकपटैः उद्यमिभिश्च पुंभिः एकेनैव वर्षेण ।

मम आशा तथा आस्था त्वादृशेषु पुंसु एव आसाते । मम वचांसि तेषां याथार्थ्येनैव अवगच्छत तेषामालोकेनैव कर्मण्यात्मनः प्रचोदयत...। मया वो यथेष्टमुपदेशः प्रादायि । साम्प्रतं तु स्वल्पशोऽपि केषाञ्चित् प्रयोगः कर्मणि विधातव्यः । जगज्जानातु यत् युष्माभिर्मम वाचां सावधानं श्रवणम् अन्वर्थं जातमिति ।

अवलम्बस्व साहसम्, कर्म च कुर्वाणो वर्तस्व। धैर्यं तथा अविचलं कर्म – इत्ययमेवैकः पन्थाः । कुर्वन् वर्तस्व, संस्मर – धृतिस्तथा पवित्रता, साहसं तथा अविचालि कर्म ... इति । यावत्त्वम् अकल्मषस्तथा स्वादर्शनिष्ठः स्याः तावत्त्वं न जातु व्यर्थताम् आप्नुयाः ।

त्वया कर्मणः सर्वेषु परिसरेषु वस्तुस्थित्यनुगुणं वर्तितव्यम् । समग्रो हि देशो बहुमतसंघातेन विध्वस्तः।

विरोधिता हि नैतिकसाहसेन समारब्धस्यैकस्य नीतिनिष्ठकर्मणः, केवलम् आरम्भकाणां नैतिकीं शक्तिं प्रोद्बोधयतितराम् । यच्च न कस्यापि प्रतिबन्धस्य नापि कस्यापि प्रातिकूल्यस्य साम्मुख्यमेति तद्धि मनुष्यान् नैतिकमृत्योः पथं नयति ।

यदि ते स्वल्पीयसी अपि कल्पनाशक्तिर्न विद्यते, यदि च कोऽपि ते मार्गप्रदर्शक आदर्शो न विद्यते तर्हि त्वमसि केवलमेकः पशुः । अतस्त्वया आदर्शो न ह्रसनीयः, नापि त्वया वस्तुस्थित्यनुगामितायाः स्वदृष्टिः परावर्तनीया । द्विविधं चरमताश्रयणम् अस्माभिरवश्यं परिहरणीयम्....। तव जीवने आत्यन्तिकादर्शवादिताया आत्यन्तिवास्तवानुगामितया सह समन्वितं विधातुं त्वयावश्यं यतनीयम् ।

युष्मासु अस्मद्देशस्य भाविन्य आशा निहिताः । युष्मान् निष्क्रियं जीवनं यापयतः प्रेक्ष्य अहं निरतिशयां व्यथाम् अनुभवामि । आत्मनः कर्मणि नियोजयत – कर्मणि ! वृथा विलम्बं मा कार्षीः ... । सर्वम् आयत्यां यथाकालं सम्पादयिष्यते इति विचिन्त्य आलस्यमास्थाय नास्यम् । युष्माभिः स्मरणीयं -- तेन पथा न किमपि सम्पादयिष्यते ।

आलस्येन अलम् । ईर्ष्याया अस्मितायाश्च सर्वेभ्यो भावेभ्य आत्मनः चिराय मोचयत । प्रभूतोद्यमेन वास्तवभूमिम् आयात परिपूर्णशक्त्या कर्म कर्तुम् ।

त्वाम् इदानीमपि ममाग्निर्नास्पृशत् – त्वं मां नावगच्छसि ! यूयं प्राक्तनेष्वेव आलस्यमयेषु भोगैर्युक्तेषु च (अपरिवर्तमानेषु गतानुगतिकेषु ) वर्त्मसु स्थ । उच्छेद्यतां सर्वमिदमालस्यं, निपात्यतां सर्वं भोगजातम् अत्र परत्र वा ...... ।

मम अनारतं प्रार्थनं यन्ममाग्निम् (ओजस्वितां) यूयं धारयत; युष्माभिरत्यन्तम् अकपटैर्भाव्यम् ।

*[ स्वामिविवेकानन्दस्यैका लघ्वी जीवनकथा (विवेकोपदेशसहिता) ]*

*[ पृ. १३२-१३४]*



॥ लेखाह्वानम् ॥

मान्याः संस्कृतानुरागिणः! सुरसरस्वतीसेवासंलग्नमानसानां सुमनसां सुमहतः मोदस्याऽयमवसरः यत् रामकृष्णमठः रामकृष्णमिशन् चेत्यनयोः पक्षतः संस्कृतपत्रिका प्रकाश्यमानास्ति । नवयुगाचार्याः श्रीमद्विवेकानन्दस्वामिपादाः संस्कृताध्ययनं संस्कृतशिक्षणं च समग्रभारते प्रचलतात् इति बहुधा इष्टवन्तः । "संस्कृतशब्दानां केवलं श्रवणमपि जनयति जनानां सम्मानं, बलं, शक्तिं च" इत्युक्तं स्वामिपादैः । संस्कृतस्य संस्कृतेश्च प्रसारार्थं प्रवृत्तायाः अस्याः पत्रिकायाः प्रकाशने प्रचारणे च संस्कृतज्ञा लेखादिप्रदानेन उपकुर्वन्तु इति सततं काम्यते । तदस्याः पत्रिकायाः कृते सादरमामन्त्र्यन्ते पद्यानि, पदबन्धाः (crossword puzzle), कथाः, चित्रकथाः, अनुवादाः, विनोदकणिकाः (jokes), वार्ताविशेषाः, निबन्धाश्च । उपरिष्टात् संसूचिताः केचन नियमाः लेखकैरवश्यमवधेयाः —

१. लेखः सरलसंस्कृतेन स्यात् , **स्वरचित** एव स्यात्, अन्यत्राप्रकाशितश्च स्यात् ।

२. सन्धिं विभज्य लेखनेन सामान्यसंस्कृतज्ञानाम् अपि अर्थबोधः स्यात् ।

३. अनुवादस्थले आकरस्य नाम निर्देश्यम् । मूलग्रन्थकर्तुः अनुमतिपत्रस्य प्रतिकृतिश्च प्रेषणीया ।

४. **Unicode fonts उपयुज्य देवनागर्या एव टङ्कणं कृत्वा word-रूपेण pdf-रूपेण च लेखः इ-पत्र(Email)-द्वारा** department.sanskrit2014@gmail.com **इत्यत्र प्रेषणीयः ।**

५. प्राप्ताः लेखाः न पुनः प्रतिप्रेष्यन्ते ।

६. **लेखानां चयने, परिशोधने, परिवर्धने च सम्पादका एव प्रमाणम् ।**

\- सम्पादकाः

# संस्कृतिसुधा



दूरभाषसंख्याः ०३३–२६५४ ९१८१/९६३२
जालपुटः www.vidyamandira.ac.in
इ–पत्रसंकेतः department.sanskrit2014@gmail.com
पत्रसंकेतः
सम्पादकः
संस्कृतिसुधा
रामकृष्णमिशन्विद्यामन्दिरम्
बेलुडमठः, हावडा,
पश्चिमवङ्गप्रदेशः
गूढसंख्या – ७११२०२

सप्तमवर्षीया, प्रथमसंख्या, मार्च २०२१ मूल्यम् – १० रूप्यकाणि